[illegible]

1555 + 784.

રિપારચીય.

[illegible]

Complete.

F — 1-20

Rhetorics.

1555

InComplete

C

	Vichar Dipa		Title
		Bhagavan Anandram	Author
			Editor
			Year, Vols.
SC			Publisher
1555	784		Remarks

श्रीगणेशाय नमः ॥ श्रीमद्गुरोः पादयुगं प्रणम्य श्रीशं च सांबं तपनं जगास्यं ॥ शास्त्रेति शब्दस्य विचारदी
पं करवै विवादं भगवान्सुबोधं १ ॥ अत्र मंगलश्लोके गुरुचतुष्टयपादद्वयं श्रीशादीन् पंचदेवान् च नत्वा नाम
वान्नामाकं विस्तरं शास्त्र इति शब्दस्य सुबोधं विचारदीपाख्यं विवादं करवै इत्यन्वयः ॥ अत्र प्रणम्येति कृ
ताद्येत्यादाविव गुरुं पादयुगादिषु चतुर्थीस्त्वान्न द्वितीयेति चेदुपपदविभक्तेः कारकविभक्तिर्बली
भ यसीति परिभाषया कारकविभक्तिर्द्वितीया उपपदविभक्तिं चतुर्थीं बाधत इति ॥ श्रीशमिति केचित्यादौ तु क्रिया
र्थोपपदस्येत्यादिना चतुर्थी ॥ सांबेति विशेषणमात्रप्रयोगो विशेष्यस्तत्र शक्तियुक्तशिवस्योपलब्धे विशेष्यां
विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ सागरांबरादिवदिति ॥ अत्र शास्त्र इति शब्दस्य रामेति लोकव
मणा दितिवद्विभक्तिकोनिर्देशः ॥ भूसत्तायामितिवदनुकरणत्वात् ॥ उक्तं च ॥ अत एव गाविस्माह
भूसत्तायामितीदृशं ॥ न प्रातिपदिकं नापि पदं साधु तु तस्मात्तमिति ॥ विचारणा दीप इव दीपः प्रकाशकः
अत्र दीपशब्देन दृष्टौ स्वव्यवसानात् लक्षणा ॥ द्वेयासाध्यवसाना सा विषयी यत्र केवल इति तल्ल
क्षणात् ॥ अन्यथा दीपकालंकार इव विचारदीपकमिति स्यात् ॥ यथा तत्र प्रसादश्लोभार्थे रथ्याया
रामो पितस्य दीपस्यानेकोऽपि कारकत्वेन साम्यादिवार्थेकल्विधानस्य तथा दर्शनात् ॥ तन्वत्र विचा
रपदं शास्त्रपदेन सह साकांक्षं तथा सति साकांक्षमसमर्थवद्भाव्यमिति वार्तिकेन सामर्थ्यात्सम
र्थः पदविधिरिति सूत्रस्याप्रवृत्तौ समासविधायकसूत्रांतराभावात्समास इति चेन्न ॥ भावतिवै
निसापेक्षस्यापि वृत्तिरिति भाष्यवार्तिकोक्तेः सर्वत्र समासदर्शनात् ॥ उक्तं त्र्यकैयटेन ॥ सांबं

धिशब्दः सापेक्षोनित्यं सवः समस्यते॥ वाक्यवशाद्व्यपेक्षा हि वृत्तावपि न हीयत इति॥ अभिनाये
नाप्येतद्भिप्रायेण सापेक्षत्वेपि गमकत्वान्न समास इति उक्तं भवति॥ तेन रत्ने गेहीतन्नुनयेन कामचै
त्रस्य शिष्यकुलं मैत्रस्य गुरुकुलमिति माख्यातं॥ तुल्यं चक्षुस्तस्य शब्दो भुवने ठुरू ठ इति पाठम
नादृत्य सत्रोत शब्दो भुवने छिति पाठो नीकार्यः॥ कुर्वद्युष्मत्तीन मयुष्मकमस्त्वहमित्यध्याहारेण बोध्यः॥
वाक्ये ह्याकांक्षितैकदेशपूरणमध्याहारः॥ आकांक्षितत्वं चार्थस्यैवान्वयस्यार्थनिष्ठत्वात्॥ यथा
भवानपीदं पश्यवानैवंपीत्यत्र युष्मच्छब्दार्थस्याध्याहार इति अन्यथा शब्दाध्याहारे वैतीत्यत्र मध्य
मपुरुषो न स्यात् युष्मच्छब्दस्य विशेष्यण प्रधान्यात् भवच्छब्दस्य तु न प्रधान्यं भातीति प्रथमानीति
व्युत्पत्तेर्विशेषणत्वानुगमात्॥ तेनतत्वं निवत्तस्व विहाय लक्ष्यं लक्ष्ये भवान् दृश्यतीति शिष्यभक्ति विस
त्रनपुनरुक्तिः॥ भवति भिक्षां देहीत्यादौ तु युष्मच्छब्दस्यैवाध्याहारः भवच्छब्दस्य संबोध्यत्वयान्व
यितार्थत्वात् अन्यथा देहीत्यत्र मध्यमपुरुषो न स्यात्। नन्वर्थनामेवान्वये शब्दाध्याहारो नयु
क्त इति चेन्न शाब्दबोधे शब्दोपि भासत इति पक्षे शब्दहादेनैवार्थानामन्वयस्वीकारात् तोयमा
त्रस्येव पिपासते पि कलशाहारे वत दानयनवदिति अत्रादौ निविघ्नपाठादिदोषपरिसमाप्त्यर्थं शिष्ट
वद्प्रयोगः कृतो भवति॥ प्रथमं तावच्छिष्टसंप्रदायार्थनमस्क्रियारूपं मंगलं निबध्नन् कं तु मिष्ट प्रति
जानीते वेदस्तु भगवान्साक्षात्तस्य व्याकरणं मुखं॥ यत्र यो वचनं शास्त्रं तास्थ्यात्तत्व परंपरत्व य
त्तु॥ द्विचकेद्विचमामांसे द्वे योगाविति षड् बुधाः॥ वेदार्थ दर्शकत्वेन दर्शनानि प्रचक्षते इति करौदि

षड्संख्याकेष्वेव शास्त्रत्वन्तान्येषु निबंधपीति विनानुशासनं चेप्रत्नपंभिमान्निरा चुष्टेवे दृष्टा
दिनौ वेदो हि साक्षाद्भगवान्नारायण इत्यर्थः तस्य भगवतो मुखमास्यं व्याकरणशास्त्रं स्मृतं शि
क्षायां तथोक्तत्वादिति भावः तयोर्यद्वचनमुपदेशो निर्देश इति यावत् तच्छास्त्रं धातुवाच्य शब्द वाच्य
मित्यर्थः तथा चोक्तं उपदेशः शास्त्रमिति प्राचां वाचां विचारणाद्धिति यथापि तेनोपुरुषायायु
पदिश्यते नेनेति करणाव्युत्पत्या शास्त्रमुपदेश इति भाष्यवृत्त्यादिषु व्याख्यानं तत्रोपि वादमात्रे करणे
घञो दुर्लभत्वात् हृगवाधातोस्तुक्तं तथापि शास्त्रशब्दस्य शासधातोरौणादिके ष्ट्रन्प्रत्यये व्युत्पादमो
वेकृतमिति बाकुलका त्करणव्युत्पत्तिं संभाय॥ निर्देशार्थं यथोः शास्त्रमित्यमरव्याने निर्देशआज्ञा
शास्यते नेनेति शास्त्रं करणार्थे ष्ट्रनितिक्षीरस्वामिना तथोपपादितत्वात् यद्यपि नवीनैः प्राचीनमतम
वस्य कारणव्युत्पत्तिर्निराकृता तथापि बाकुलकस्य व्यगतिकगत्वेनस्वीकारादिच्यारान्प्राचीनमतं
सम्यगेवप्रतिभातीति एवं च सर्वेषां निर्देशानां यथानां च शास्त्रत्वे सिद्धे सति व्याकरणस्य तदंतर्ग
तानां सकलानां च तत्वन्निष्पन्नमेव शाब्दिकानां शास्त्रपक्षविचारे शास्त्रसकलमित्युक्तत्वात् सत्रा
णामेव सिद्धत्वासिद्धत्वमिति उक्तञ्च सामान्यशास्त्रतो नूनं विशेषो बलवान्भवेत् परेण पूर्वं बाधो
वा प्रायशो दृश्यतामिहेति अस्य व्याख्याने माधवोप्याह सामान्यमुत्सर्गस्तस्य शास्त्रं सूत्रं लक्ष
णमिति यावत् एतेन यथा नैयायिकानां पृथिव्यप्तेजोवाय्वाकाशादीनां लक्षणानि तथा वैयाकर

णानां सूत्राणि त्ववधेयं शब्दशास्त्रमनधीत्य यः पुमान्वक्तुमिच्छति वचः सभान्तरे हस्तिनं कमलनाल
श्री तन्तुना बद्धुमिच्छति मदोत्कटं वनेऽइत्यादिश्लोकेष्वपि व्याकरणस्यैव शास्त्रशब्दव्यवहारः न च व्याकरणस्य
तत्त्वेऽभानाभावइतिवाच्यं॥ शास्त्रत्वासिद्धपक्षे सामान्यशास्त्रतोऽन्यून्मिलादौ चासिद्धत्वासिद्धत्वयोर्दर्शि
२ तनस्यैव मानत्वात् इतरेतराण्यपि कार्याणि शास्त्रेण प्रकल्प्यन्ते अर्थदकोऽशहत्वास्त्वेषु णादेशादि
वचस्यादि मानत्वाच्च न च व्याकरणास्यैव मुखत्वेन तत्त्वेऽन्यायादिषु तत्प्रतिलिङ्गिभङ्गापत्तिः
स्यादिसार्थशंकायामाह तासामपीदं स्यादिति ताल्वोष्ठादिस्य अनुशासनात्तात्स्मिन्निष्ट इतीत
स्थस्तस्य भावस्तत्त्वं तस्मात् परेषु न्यायमीमांसावेदान्ताष्टादशस्मृतिकाव्यालंकाररसनाट
कसंगीतकामगजशास्त्रादिषु तत्त्वं शास्त्रत्वं मंगीकृतं शिष्टैरिति शेषः सर्वेष्वपि निबंधेषु व्याकर
णस्य प्रकृतिप्रत्ययोत्सर्गापवादसूत्रनिष्पन्नशेषरूपेण स्थितिसंभवात् शास्त्रत्वमिति भावः ए
वं च पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाः स्थानानि विद्यानां धर्मस्य च चतु
र्दशेति याज्ञवल्क्योक्तचतुर्दशविद्यानिवासकवलभ्यते षु वेदेष्वथ च पुराणन्यायमीमांसाधर्म
शास्त्रशिक्षाकल्पव्याकरणनिरुक्तछंदसुज्योतिषेति चतुर्दशसु तत्त्वमरविरुद्ध [illegible] स्तीति अं
त्रेदमवधेयं शरीरिणां हस्तपादाद्यंगेषु मुखस्यैवैवं वेदस्यापि शिक्षाकल्पाद्यंगेषु व्याकरणस्यै
व मुखत्वं यज्ञकर्मणि वैयाकरणानां प्राधान्यदर्शनात् तथाहि तां जयां विशादिते विभक्तिभि २

व्यंतिभिस्त्वनिखिलाश्रितागमे तत्र कर्मसु विपर्यणीनमत्रं मंत्रसूक्तकुशलाः प्रयोगिण इति इत्थं च का
व्यस्याप्युपदेशकत्वाच्छास्त्रत्वं अस्योपदेशकत्वं चोक्तमालंकारिकैः तथाहि काव्यं यशसेऽर्थकृते व्य
वहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुज्यत इति काव्यलक्षणं सत्करमवि
त्वासे काव्यप्रकाशे च इत्थं निरूपिता सपरिकरो रसरूपः काव्यस्यात्मा इदानीं शरीरभूतकाव्यपदप्रतिपाद्य
त्वरूपलक्षणमावच्छेकाकांतस्य तस्य लक्षणमुच्यते तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि
ति निर्दोषत्वादिविशेषणविशिष्टशब्दार्थौ काव्यपदवाच्यौ॥ अदोषाविस्यत्रानुदराकन्यैतिवन्नयोऽन्या
र्थत्वयावद्दोषत्वारणस्य दुःसाध्यत्वात् तस्यबाधदोषाभावेको व्यंदुष्टमितिव्यवहारो न स्यात्॥ काव्य
स्य शास्त्रत्वेन तादृक्प्रसिद्धिर्नास्तीति चेत् पुराणेऽपि समानं॥ इदं भागवतं नाम पुराणं ब्रह्मसम्मितमिति
भागवतस्य पुराणत्वयात्र सिद्धिस्तत्वेऽपि संक्षेपतो विस्तरतश्चेति द्विधा चास्य श्रीभागवतस्य शास्त्रस्य प्र
वृत्तिरिति श्रीधरस्वामिनोक्तमस्तीति तेन पुराणेऽपि तथा व्यवहारदर्शनात्तत्त्वमेवेऽपि भावः अन्यथा या
ज्ञवल्क्योक्तेषु चतुर्दशसु तत्त्वतया केषांचिद्विद्यागेकेषांचित्त्वीकारे द्वर्जरतिया पत्तिः स्यात्॥ किं च न्या
यादिषट्संख्याकेष्वेव तत्त्वेन शास्त्राध्ययने ब्राह्मणानामेवाधिकारस्तेषां यथावृत्त्यिस्त्वं तथा गजव
शीकरणग्रंथाध्ययने नाधिकारिणः स्यादपि शास्त्रमस्तीति अन्यथा निर्धनत्वबीजमपि बालककुतुकं तंत्रयं
तात्क्रमेणापदिसांत्वनतर्जनाभिः॥ शिक्षावशेन [illegible] शाममानि नायशास्त्रं सुनिश्चितस्थियाः क्तेन

सिध्यिमेतीत्यादौ सामान्येन विशेषसमर्थनरूपार्थान्तरन्यासालंकारो न स्यात् गजवशीकरणार्थं
धस्याभ्यासात्वेनत्पाठकस्य पारिणस्यापितत्वाभावान्न सामान्यत्वाभावः तथा समितिनिविशेषेन
सामान्यं विशेषान्न तदुदिताइतिन्यायात्केसामान्येन विशेषसमर्थनमिति विशेषार्थेवर्णनीयेतेन
सहाप्रस्तुतसामान्यरूपार्थान्तरानेवा अथवा सामान्यार्थेवर्णनीये तेन सह वर्णनीयार्थान्तरारोपे
अर्थान्तरन्यास इति सिद्धान्तात् ॥ वस्तुतस्तु कोक गजवशीकरणार्थं धात्वादिशुशास्त्र मिवशास्त्र मितिगौण्या
वृत्त्यात् व्यवहारः ॥ यथा शास्त्रमध्येतृणां फलदायकं तथा तत्पाठकानां तत्फलदायकमिति बो
ध्यं ॥ एतेनवयमस्तुतमाः शास्त्रिणएते पौराणिकाः काव्यालंकाररसनाटकाध्येतारश्च सामान्याइ
ति वैधेय समाजे गवैयोषित्याच स्वप्रोठिं नाटयंतः प्रस्तुताः किंच यत्कीर्तनात्सुकमेत्रे पादयोयत्
वणात्सतिद्धिहुतादयश्च ब्रह्मपदवीं प्राप्ताः तद्धिकथनं दोषावहमिति तस्य वेदार्थत्वात् उक्तंचकपि
लाउग्यपानेन ब्राह्मणीगमनेन च वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत् न तस्माच्छृणुयाच्छूद्रा
ज्ञात्वा वेदं कथ्यं न च तदर्थं च पुराणेषु शृणुयात्तु किभिः स्मृतामिति एवं च पौराणीवृत्तिमाश्रित्यवेदी
वंतिद्विजायतः ॥ तेसूर्यमंडलं भित्वा यान्ति ब्रह्म सनातनमिति तस्मात्पुराणानुवाचनासौराणिका
नामिव पदार्थज्ञानानैयायिकानामिव शब्दार्थज्ञानाद्वैयाकरणानां मोक्षो भवतीति तथा च श्रुतिः
एकः शब्दः सुप्रयुक्तः सम्यक्ज्ञातः स्वर्गे लोके कामधुग्भवतीति शब्दानां ब्रह्मरूपत्वात् ॥ उक्तं च ॥ २

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति स्मृतिः स्फोटस्यैव प्रमा
णमपि प्रसंगाद्दर्शितं वैयाकरणानां स्फोटोर्थनिर्वक्ति द्विविधः शब्दः यस्मादर्थः स्फुटीभवति स स्फोटः यस्मात्
स्फोटः स्फुटीभवति स ध्वनिर्लिपिवत्स्फोटानुस्मारकः ननु पूर्वपूर्ववर्णव्याहारजन्यसंस्कारसहकृतेन चरमवर्णे
नार्थः स्फुटीभवि ~~स्फोटः यस्मात्स्फोटः स्फुटीभवति~~ ष्यतीति किं स्फोटकल्पनयेति चेन्न ॥ तयोरुभयोरपि संकेता
भावादर्थान्तरतीयापत्तेः स्फोटो यदि न स्यात्तर्हि स एवायं मंत्र इति प्रत्यभिज्ञापि न स्यात् न चैयं प्रत्यभिज्ञा जात्यालं
बनेयथ वाशितिवाच्यं ॥ कृतपुरश्चरणवदन्यमंत्रस्याफलवत्वापत्तेः स्फोटं विना पुरश्चरणजन्यासिद्धेर्निर्विषय
तापत्तेश्च ॥ किंच मंत्रमूर्तीनां देवानां विनाशित्वप्रसज्येत तस्मात्स्फोटकल्पना समंजसैव ॥ यदि शब्दे नष्टेन संस्का
स्या रोर्थवत्त्वं स्यात्तदा घटे नष्टे तदनुभवजन्यसंस्कारस्य तदीयध्वंसस्य वा जलाहरणयोग्यता कुर्वीरन् ॥ अन्यच्च पू
र्वसंस्कारस्य वर्णयोरुभयोरभेदादेककार्यकारित्वासंभवः ॥ ननु संकेताभावेर्थव्यक्तिर्न स्यादिति चेद्वर्णस्फोटो
नास्त्येवेति चेद् ॥ रामइत्यादौ भवतीत्यादौ च पर्यायेणैकैकवर्णविपर्यये वा अविपर्ययादन्वयव्यतिरेकाभ्यां
वर्णानामपि वाचकत्वात् हूतो स्फोटसिद्धिः सरो रस इत्यादौ वर्णानुपूर्वविच्छिन्नपदस्य संकेतगोचरत्वात्पद
स्फोटसिद्धिः ॥ सस्तेन्नस्या केवलात्प्रत्ययात् दात्यवृत्तिनिवृत्तिरूपव्यवहारानुमतेर्वाक्यस्फोटसिद्धिः ॥ व
र्णस्फोटं न मीकारबीजानां देवतावाचकत्वं न सिध्येत् ॥ ननु स्फोटकः पदार्थ इति वर्णानां प्रध्वंसाभावः स्फोटइ
ति चेन्न ॥ अभावस्य भावकार्यकारित्वासंभवात् ॥ तस्माच्छब्दब्रह्मरूपः स्फोटो भावपदार्थः ॥ यद्यपि वर्णाभिव्यक्ति

स्फोटः सखंडपदव्यक्तिस्फोटः अखंडपदव्यक्तिस्फोटः अखंडवाक्यव्यक्तिस्फोटः अखंडवर्णजातिस्फोटः अ
खंडपदजातिस्फोटः अखंडवाक्यजातिस्फोटइत्यष्टौ स्फोटपक्षाः सिद्धांतग्रंथेषूक्तास्तत्रापि वाक्यस्फोटतात्प
र्यं तत्रापि जातिस्फोटइति इदं च ध्वनिव्यंग्यत्वे सति संकेतितार्थबोधकत्वं स्फोटस्य लक्षणमिति प्रकृतमनुसरा
मः किंच शास्त्रशब्दस्यानेकार्थत्वाद्योगरूढ्या संभवकाले सर्वेभ्यः प्रतिपाद्यं नैकस्मिन्नेव प्रतिपत्तिः तत्रैक
कालावच्छेदेन सर्वार्थबोधनं तु न भवति सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति न्यायात् यथा सकृत्प्रयुक्तः
शरः सकृल्लक्ष्यं भिनत्तीति तद्यस्यार्थः यथानेकार्थस्मरणे न युगपत्सर्वबोधारोहणं किंतु पर्यायेणेत्या
दित्यर्थः आलंकारिकास्तु सकृदुच्चरितस्य स्याति सत्त्वमात्रेण नानार्थेषु यत्र तात्पर्यग्राहकप्रकर
णादिकं युगपद्भवति तत्र श्लेषालंकारः यत्र क्रमेण तात्पर्यं तत्रावृत्तिरिति इदं च सर्वत्र तात्पर्यग्राहकप्रकरणा
दिकमेव॥ उक्तं च काव्यप्रकाशे अनेकार्थस्य शब्दस्य वाचकत्वे नियंत्रिते॥ संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरं र्थ
जनं॥ संयोगो विप्रयोगश्च साहचर्यं विरोधिता अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य सन्निधिः सामर्थ्यमौचिती
देशः कालो व्यक्तिः स्वरादयः शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः इति अनेकार्थस्य शब्दस्य कतमोऽर्थोऽत्र वि
वक्षित इति संदेहे प्राप्ते सति विशेषः प्रकृतार्थकस्य स्मृतिकारणानि संयोगादीनीत्यर्थः संयोगादीनामुदा
हरणानि तु विस्तरभियानोच्यंते॥ प्रकरणोदाहरणं तु सर्वं गुणवान्सर्वं जानाति देव इति राजानं प्रति हितवच
ने देवशब्दस्यानेकार्थत्वं तु राजा भट्टारको देव इति कोशात्॥ ननु सर्वगुणवानित्यत्र न कर्मधारयो मत्वर्थीयो बहु

व्रीहिश्चेदर्थप्रत्यायकः इति निषेधात्सर्वे गुणा यस्य सर्वगुण इति बहुव्रीहिर्नैवार्थं विवहिः किमर्थं कर्मधारयान्मत्वर्थी
नप्रत्ययेन वृत्तिद्वयकल्पनेन गौरवमिति पूर्वपक्षः अत्रोच्यते कृष्णसारंगः इत्यत्र वर्णो वर्णेनेति सूत्रेण कृष्णेन सारंगः
कृष्णसारंग इति यद्वा कृष्णः सारंगः कृष्णसारंग इति कस्त्वत्र विशेष इति प्रसंगाद्बहुव्रीहिकर्मधारयोः प्राप्तौ निर्णय
माह भाष्यकारः अत्र समानाधिकरणे समासाद्बहुव्रीहिर्भवति विप्रतिषेधेन कदाचित्कर्मधारयः सर्वधनाद्यर्थमि
ति॥ अत्र यद्यपि विप्रतिषेधेन वृत्तिद्वयकल्पनेन गौरवनिरासार्थं बहुव्रीहिः प्राप्तिः सर्वत्र प्राय एवार्थं यत्र कर्मधारय
प्रकृतिभिर्मत्वर्थीयेन निषेधकत्वात्स्वीकृतिद्वयकल्पनगौरवाभावान्मत्वर्थीयप्रत्ययस्य सर्वथा निषेधोऽपि किंचिदाचार्याः का
र्यं बुद्धिं कृत्वा पठंति॥ अस्ति चात्र विशेषः मत्वर्थीयप्रत्ययेऽर्थे मतिं ददद्यः सत्तार्थनिर्देशाद्बहुव्रीहिणा न ज्ञायते त
स्मात्फलमुखं गौरवं न दोषायेति सिद्धांतात् वृत्तिद्वयकल्पनगौरवमंगीकृतमिति॥ एवं सति सर्वधनी सर्वबीजी स
र्वकेशी नाटः अनुरागी एकदेशी गौरखरवदरण्यं कृष्णसर्पवान्वल्मीकः लोहितशालिमान्ग्रामः नीलरूपवत्सरोव
हंसचिह्नकूलवानित्यादिप्रयोगाणां भर्तृमतिंद्वादिविशेषार्थप्रतीत्यर्थं मत्वर्थीयप्रत्ययमन्वाख्यः किं बहुव्रीहिप्रयो
जनं॥ किंच विप्रतिषेधपरमिति॥ अत्रेष्टवाचीपरशब्दः विप्रतिषेधे परं यदिष्टं तद्भवतीति व्याख्यानादिष्टत्वाभावा
न्न बहुव्रीहिरिति॥ केचित्तु कृष्णसर्पवान्वल्मीक इति भाष्यवचनज्ञापकान्मत्वर्थीयोऽस्तीति वदंति तन्मतं चारु
तोऽस्तीति इति॥ नह्येकेन ज्ञापकेन निखिलप्रयोगाणां निष्पत्तिः किंतु अगतिकतया कस्यचित्प्रयोगस्य ज्ञापक
सिद्धं न सर्वत्रेति निषेधात्॥ नहि स्वार्थत्रिंशप्रयोगाणां ज्ञापकेन प्रामादिकत्वेन वा समाधानं किंतु क्वाचित्क
स्यैव इदं च सुभ्रूशब्दस्य नेयङुवङ्स्थानावस्त्रीति नदीसंज्ञाप्रतिषेधादर्थवत्त्वाभावात्कस्यचिदिति संकोचकस्य बं

नास्तीति नेन ह्रस्वप्रयोगः प्रमादिक इति तेन हापितः क्वासि हे सुभ्रु इति भट्टिप्रयोगसमाधानं केचित्कृतमपि न त
त्समंजसं ॥ सुभ्रूशब्दस्य संबुद्धौ ह्रस्वत्वं न स्यैव सर्वत्र प्रयोगदर्शनं न तु दीर्घांतस्य कुत्रापीति प्रमादिकप्रयोगः
क्वापि कोपि भवति विश्वजनीनः बहुप्रयोगदर्शनं तु वयं कलादाइव दुर्विदग्धत्वज्ञौ रिमस्पर्द्धि देहे महेम प्रसन्न
नादाचशरासनस्य सहैकवंशप्रभवा सुभ्रु ॥ इति नैषधे सुभ्रुत्वं कुपिते त्वया त्वमप्यानंत्यकांक्षयोषितामि
ति रसविलासे काव्यप्रकाशे च राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणं गता इति तथा आस्थिताः सुभ्रु ऽप्रायः सी पदवीं
द्वंतियोषित इति श्रीमद्भागवते विमानना सुभ्रु कुतः पितुर्गृह इति कुमारसंभवे कालिदासप्रयोगश्चेति प्र
यस्त्वं कुतस्तात गृहे वमानने ति पाठांतरं विधाय शब्दांतरत्वमापादकश्चित्समाधानं करोति स देवप्रियः ए
व मूर्खवंति यावत् वंशस्थवृत्ते पादादौ जगणभंगप्रसंगात् वंशस्थवृत्तलक्षणं तु वृत्तरत्नाकरे जतौ तु वंश
स्थमुदीरितं जराविति वस्तुतः समाधानं तु अप्राणिजातेश्चारज्वादीनामित्यत्र अलाबूः कर्कंधूरिति काला
द्ध्वूङ् प्रत्ययमुदाजहार भाष्यकारः यथाह वामनः ऊङ्कारांताद्ध्वूङ् प्रवृत्तिरिति तेन सुभ्रूशब्दस्य ध्वूङ्
प्रत्ययांतत्वं विधाय शब्दांतरत्वमापादनीयं यद्वा ऊङुतः इति सूत्रे ऊङ् इति योगो विभज्यते तत्र वार्थवशात्
मंडूकप्लुत्या बहुव्रीहेरित्यनुवर्तनीयं ॥ तेन क्वचित् बहुव्रीहेरूङ् स्यादित्यर्थे सिद्धे सुभ्रूशब्दस्योङ् प्रत्ययांत
त्वेन शब्दांतरत्वान्नदीसंज्ञासद्भावे अंबार्थनद्योर्ह्रस्व इति ह्रस्वत्वं ॥ तेन हे सुभ्रु इत्यादि सिद्धमेव बहुव्रीहेर
न्यत्र वृत्तिपक्षेपि क्वाचित्कत्वार्थ लभ्यं तेन अलाबूः कर्कंधूः इत्यत्र ध्वूङ् प्रत्ययः साधुरेव एतदुदाहरणाद्वय
दीर्घाद्ध्वूङ् प्रत्यये कृते ताभाष्यकारेण यं योगविभागो ज्ञाप्यते ऊतः इति न परकरणस्यातेन त्वं वा प्र ५

प्राणिजातेश्चेत्यादि वार्तिके इकारस्यौकारानुवृत्ति न वचिकारो नुक्तसमुच्चयार्थ इति वा तेन दीर्घोदाहरणा तापि तेन यो
गविभागेनैवास्योङ् प्रत्ययांतत्वं सुवचमिति शब्दांतरत्वेन नदीसंज्ञासद्भावात् संबुद्धौ ह्रस्वोपपत्त्यैवेति संक्षेपः ॥ प
दत्वैवेति प्रसंगादेवकारार्थोपि निरूप्यते एवकारार्थस्त्रिधा भवति एकः क्रियासंगतः द्वितीयो विशेषणसंग
तः तृतीयो विशेष्यसंगत इति तत्र क्रियासंगतस्यैवकारस्यात्यंतायोगव्यवच्छेदोर्थः यथा नीलं सरोजं भवत्येव ॥
विशेषणसंगतस्यायोगव्यवच्छेदोर्थः यथा शंखः पांडुर एवेति ॥ विशेष्यसंगतस्यान्ययोगव्यवच्छेदोर्थः यथा
पार्थ एव धनुर्धर इति तेनानेकार्थत्वमस्य बोध्यं एवं सति अस्यैव भार्या भवितुं रुक्मिण्यर्हतीति नापरा अस्यैव
त्पन न्वद्या त्यक्तभैक्ष्यः समुचितः पतिरित्यत्र नेकार्थस्याप्येकस्यैवकारस्य अस्यैव रुक्मिण्येव अर्हत्येवेति
पूर्वार्द्धे वधारणत्रयं अस्यैव भैक्ष्य एव समुचित एवस्यैवत्यवधारणत्रयमुत्तरार्द्धे इति कथं युगपत्त्व प
षड्भिः सहान्वयेन षड्वधारणानीति चेदुच्यते अत्र श्रीधरस्वामिनो यमाशयः भस्येति पदसमभिव्याहृतो
वकारः पर्यायेणान्वेति न तु युगपदिति सकृदुच्चरितः शब्दः सकृदर्थं बोधयति सकृदेवान्वेति चेति न्यायात्
गा हर्यादिशब्दानामनेकार्थत्वेपि पर्यायेणैवार्थबोधकत्वं न त्वनेकार्थाधिपतेर्युग
पत्सर्वार्थबोधनं क्रिमवत्कमपीति त्रिस्वामिन एकार्थस्य वा न हि युगपत्तन्त्रयाणामारोहणमिति वा इत्थं च
यद्यपि सर्वत्रायोगव्यवच्छेदार्थको न्ययोगव्यवच्छेदार्थकोत्यंतायोगव्यवच्छेदार्थक इति अर्थत्रयवान्येनका
रो भवति तथापि तु अन्ययोगव्यवच्छेदार्थक एक एवैवकारः पर्यायेण षड्भिः योजान्वेति युगपदुच्चरत्वं तु
अन्वययोग्यतासत्त्वनार्थमिति रुक्मिणी अस्यैव कस्यैव भार्या भवितुमर्हति नान्यस्येत्यर्थलभ्यं तेन

श्रीकृष्णादन्यस्य चेद्यादेरेवकारेणान्ययोगव्यवछेदो बोध्यः॥ कृतदृशपेक्षायामाह नापरेति इयं अपरा न भवतीति किं तु राघवस्येव वैदेही तारुक्मिणी कृष्णजन्मनीति पुराणवचनात् याकृष्णजन्मनि। सीता सैव रुक्मिणीत्यायेति सुज्ञानामयमाशयः यद्वा नास्ति अपरः श्रीकृष्णादन्यो वरणीयत्वेन यस्या इति स्वस्य श्रीकृष्णसाधारण गुणश्रवणात् यद्वा नास्ति आसमंतात्परा उत्कृष्टा यस्याः सकाशात् इति किं चास्य श्रीकृष्णस्य रुक्मिण्येव भार्या भवितुमर्हतिनापरेति रुक्मिणीपदसमभिव्याहृतैवकारेणान्यकर्तृतायोगव्यवछेदः यद्यपि सत्य भामादीनां योग्यतास्ति तथापि पौरजनानां भविष्य ज्ञानाभावान्नतादृक्संकेतः पूर्वव्याख्यानेतु अस्येति समपदसमभिव्याहृतैवकारेणान्ययोगव्यवछेदार्थमवधारणमत्र तु शाब्दमिति भेदः किंच रुक्मिणी अस्य भार्या भवितुं यद्वा अभार्या भार्या न तथा संपद्यमाना भवितुमिति च्विप्रत्यये समस्तं पदं अर्हति एवेति क्रिया पदसमभिव्याहृतैवकारेणायोग्यतायाः अत्यंताभावव्यवछेदाद्योग्यतावधारणमिति त्रिधा व्याख्या नेन भैष्म्याः सकलगुणसंपन्नत्वं पूर्वार्द्धेन व्यज्यते अथोत्तरार्द्धं व्याख्या अपि श्वार्थे च परं अनवद्या त्मा स्तुत्यविग्रहः स्तुत्यस्वभावो वा आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि त्यमरः असौ वैदर्भ्याः पति र्वरः सम्यगुचितः समुचितः योग्योस्तीत्यर्थः सकलगुणसंपन्नत्वेन स्पृहणीयगुणत्वादित्यर्थः उक्तं च कन्या वरयते रूपं माता वित्तं पिता श्रुतं बांधवाः कुलमिच्छंति मिष्टान्नमितरे जना इति किं च भैष्म्या एव अन्यत्र त्मा सौपतिः समुचितो नातिरमणीय नसमपन्नवरगुणसंपन्नत्वात् शास्त्र प्रवीणत्वाच्चेत्यर्थः उक्तं च कुलं च शीलं च सनाथता च विद्या च वित्तं च वपुर्वयश्च एतान् गुणान्सप्त विचिंत्य देयः कन्या बुधैः शेषम् अचिंतनीयमिति अथ च॥

५

असौ भैष्म्याः पतिः समुचित एव नानुचितोस्ति अत्रापि त्रिधा व्याख्याने एवकारेणान्ययोगव्यवछेदाद्यवधा रणत्रयं पूर्ववत् ज्ञेयं एवं च पूर्वार्थे विधारणत्रयं तथोत्तरार्थेत्रयमिति षड्भावना इति ननु पूर्वार्धे षष्ठ्यंत पदेन प्रथमांतपदेन च विवक्षिते पर्थसिद्धे पुनर्विभक्तिव्यत्यासेनोत्तरार्थे पितदेव कथनं पुनरुक्ति दोषग्रस्त मितिचेत् पूर्वार्थेनास्ति आसमंतात्परा उत्कृष्टेति व्याख्यानात् रुक्मिण्युत्कर्षप्रतीतिः उत्तरार्थेतु अनवद्यात्मे ति विशेषणात् श्रीकृष्णोत्कर्षाभिव्यक्तिरिति इत्थं च परस्परगुणोत्कर्षाभिव्यक्तिर्वाक्यद्वयेनैवात्रास्तीति तस्मा दनयोः परस्परं श्लाघ्य संबंध योग्यता दृढीकरणार्थं वाक्यद्वयमनिबंधमिति दिक् एवकारस्य चादिगणांतर्वर्ति त्वेन निपातत्वादस्य द्योतकत्वं वाचकत्वं वेति विचार्यते प्रादयो द्योतकाश्चादयो वाचका इति नैयायिकम तं यदागमे हि यो दृश्यते मतस्यार्थ इति न्यायान्निपातानां वाचकत्वमिति नैयायिकोक्तं नादरणीयं एतयो वैषम्ये मानाभावात् तस्मान्निपातानां द्योतकत्वमेव समंजसमिति वैयाकरणाः तार्किकमते तु निपातानां वाच कत्वे काव्यादावन्वयो न स्यादेव वैयाकरणमते तु अन्वयस्तु नास्ति द्योतकत्वादिति न कश्चिद्दोषः वागर्थाविव संपृक्तौ पार्वतीपरमेश्वरौ वन्दे इत्यत्र वागर्थयोर्वद्विकमत्वाभावान्न तत्राद्वितीयाया अन्वयो न स्यादेव द्वा र्थस्य कर्मत्व बोधक संभवात् इति स्पष्टम् यद्वा वैयाकरणानामालंकारिकाणां च द्योतकत्वपक्षे नाम्ब्रह सेवाचको विशेषणासंभवात् तत्कोपि वेतिवाक्यपदीयवचनं संगमेव निपाताश्चोपसर्गाश्च धात वश्चेति त्रयः अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनमिति वचनात् निश्चये न पतंत्यनेकार्थे ष्विति [illegible] वाच्य [illegible] त्वादिति यत्तु भूषणे वागर्थयोर्वैद्विकर्मत्वात् द्वितीयाया अन्वयोन स्यादिस्युक्तं तत्समन्वयदत्तो व्याघातात् कर्मत्वाभावे द्वितीयाया अप्यभावा

केन सूत्रेणादिति ऽर्थविधानमिति पूर्वपक्षः वस्तुतस्तत्र द्वितीयेऽर्थं वक्तुं नार्हतीति किं तु प्रथमे सैवेति तथा
हि योगार्थाविवक्षायां पंकशब्दस्य सादृश्यवाचकत्वं केन प्रकारेणाविवक्षितमिति चेदुच्यते योगार्थावि
वक्षायां योगार्थो नित्यसंबंधेन संपंकेन संश्लेष्यैकीभूतौ नित्यः शब्दार्थसंबंध इति मीमांसकोक्तेः तथा
तेन प्रकारेणासंपंको प्रावर्तीपरमेश्वरो इत्यन्वयः संपद्यते तेनोसंपृक्तो व्यतिरिक्तस्त्रस्य कर्तृकताचो
कत्वात्तथा मैवन द्वितीयेति सुधितात्कृष्णयाद्यावधातव्यमित्यालंकारिकाः किं च शब्दार्थयोर्बोध्यबोधक
भावलक्षणः संबंधो वृत्तिः सा च शब्दनिष्ठा अर्थविषया चेत्युभयधर्मः शक्तिलक्षणा व्यंजना भेदात्त्रिधा
सेत्याहुः तत्र चास्माच्छब्दादयमर्थो बोद्धव्य इति प्रवर्तको पदेशः संकेतः स एव शक्तिरिति तार्किकाः त
दतिरिक्तातत्सहायाचेत्यालंकारिकाः सर्वशब्दानामाहत्यव्याहकत्वरूपे देशाक्ती इति वैयाकरणाः वृत्तिवि
षयभूतोऽर्थस्तथा च शब्दा अपि त्रिविधाः तत्राद्यः शाक्यो द्वितीयो लाक्षणिकस्तृतीयो व्यंजकश्चेति वृ
त्तित्रयमध्ये संकेतसहकारिणी शक्तिः सा च शक्तिस्त्रिधा योगो रूढिर्योगरूढिश्चेति जातिगुणक्रियाय
दृच्छेति तु प्रवृत्तिनिमित्तानि एवं सति वागर्थाविति प्रथमो यवया इवेति च द्वितीयस्तयोरविवेन विभक्त्य
लोपः पूर्वपदप्रकृतिस्वरत्वं चेति वक्तव्यमिति वार्तिकेन समासे सति याशक्तिः संपद्यते सा समस्तशब्दनिष्ठा यो
गशक्तिः ननु समासे खलु भिन्नैव शक्तिः पंकजशब्दवत् बहूनां वृत्तिधर्माणां वचनेनैव साधने स्यान्मयूरे
वंतस्मादेकार्थीभाव आश्रित इति सिद्धांतादत्र अवयवविभागकल्पनाभावाद्योगशक्तिर्न स्यादिति वा
च्यं अजहत्स्वार्थावृत्तिपक्षे विभागानंगीकारेऽपि अजहत्स्वार्थावृत्तिपक्षस्यापि व्यवहारोपयोगेन स्वीकारात् १
उद्धार्कृति वेत्र तु इव शब्दस्य विशेष्यवाम नपदेन महान्यमस्य विवक्षा शब्दाक्रांतेन समासोभा

वान्न समासः ननु किमत्र समासप्रयोजनं सति समासेऽपि विशेषाभावादिति चेत् अभिन्नक्रमत्वं स्वरविष
यो सो नित्यसमासत्वं च समासप्रयोजनमिति हेतोरिति किं च तत्र्दकाणामंते तु पाचकपदं चतुर्धा रूढं योगिकं
योगरूढं योगिकरूढं चेति गोः पाचकः पंकजं उद्भिदादिति तत्र पाचक इति योगिकोदाहरणे यतः शक्तं पदं
पंच अक इति न तद्योगिकं समुदायस्तु यथा नियोगिकस्तथापि न शक्त इति एवं च शक्तं पदं काचिद्योगिकमि
त्यविचारिताभिधानं एवं रूढमुदाहरणमप्यसंगतं गच्छतीति गौरिति व्युत्पत्तेरिति अत्र समाधानं तु नत्वयी
नमित्यविलोपं किंतशात्वतमाश्रोपविद्धिविधः अकारांतो हलंतश्च आद्यो डिश्यादिवत्संज्ञाशब्दो माद्रव
कुलजविशेषरूढः कश्चित्तु खं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते इति सात्वतादीनामधि
पो राजसु मसेन इति श्रीमद्भागवते तथा वर्णनात् द्वितीयस्तु पंकजादिशब्दवद्भक्तोपासकविशेषेषु यो
गरूढः नमो नमस्तेऽस्त्वृषभाय सात्वतामित्यत्र सात्वतां ऋषभाय पालकायेत्यर्थः अपि च्चिद्दासो
भगवान्नु खंवोयः सात्वतां कामदुघो निरुद्ध इत्यत्र सात्वतामुपासकानां भक्तानां वा कामान्दोग्धि पूरयती
ति कामदुघो मनोरथपूरक इत्यर्थः योगश्च ।। सत्वस्य चित्ताहंकारबुद्धिमनोरूपस्य चतुर्विधः स्यांतः करणे
स्य समूहः सात्वं तदधिष्ठानमस्त्येषामिति सात्वाः क्रमेण वासुदेवसंकर्षणप्रद्युम्नानिरुद्धास्तत्पर
तदधिष्ठातृदेवास्तानतंतिनिष्ठैर्ध्यानोपासनया प्राप्नुवंतीति सात्वताः क्विपि शकंध्वादित्वात्पररूपं तेषां २
भक्तानामुपासकानां चेति तत्रैव व्याख्यातं अत्र योगस्यैव प्राबल्याद्योगरूढोऽयमिति तेनेदं शब्दद्वयं
रूढियोगरूढ्योः पृथगुदाहरणं स्पष्टमेव तथा चतुं कुरुशब्दोपि गंधर्वविशेषसंज्ञायां रूढः तुंबति

सुशब्दं करोती तुंबुरुः तुंबधातोरुरुन्प्रत्यय इति हेमकोशे देवजातिगंधर्ववर्गप्रकारेण व्याख्यानेत
शब्दव्युत्पत्तिदर्शनात् तेन संज्ञारूढोयमेकार्थवाचकः शब्दस्तत्कारत्रयविशिष्टस्तद्वधेयं अथ लक्षणा॥
शक्यसंबंधो लक्षणेति तार्किकाः संबंधस्योभयनिष्ठत्वान्मुख्यशब्देपीयं प्रवर्तते॥ तस्माच्छक्यसंबंधे
नाशक्यार्थप्रतिपादनी वृत्तिर्लक्षणेत्यालंकारिकाः यथा केनचिद्धूकवता अनुकरणमिति तो बालोन
गच्छेदमुदो भेदं प्राणप्रहरणं च करोति तथैकाभिधाव्यापारवतः शब्दस्य पदार्थोपस्थितिरिति
लक्षणाच्च नांगीकार्या स्याद्दीर्घदीर्घाभिधाव्यापारेणातीरादिप्रसिद्धेरिति वैयाकरणाः सा च लक्ष
णावृत्तिः शब्दव्यापारत्वाच्छब्दनिष्ठा मुख्यार्थबोधे सति तत्संबंधिनमर्थं विषयीकरोति उक्तं च मुख्या
र्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् अन्योर्थो लक्ष्यते यत्सा लक्षणारोपितक्रियते मुख्यार्थबाधे
सति मुख्यार्थयोगे सति रूढेः प्रयोजनाद्वा यया वृत्त्या अन्योर्थो लक्ष्यते सा लक्षणेत्यन्वयः। प्र
थमं तावल्लक्षणा त्रिविधा भवति जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति यत्र
सति मुख्याबाधे शब्दः शक्यार्थं जहाति तत्र जहल्लक्षणा। यत्र तमर्थं न जहाति तत्राजहल्लक्षणा
यत्र तदुभयं तत्र जहदजहल्लक्षणा पुनस्त्रिविधापीयं द्विविधा निरूढा फलवती चा॥
निरूढलक्षणीयाः शक्तितुल्यत्वात्कोशादिप्रसिद्धा इयं तु शक्तितुल्यापि मुख्यार्थ
बाधे सति स्यादिति न शक्तितोऽस्या विशेषः अनादिलक्षणा चैषेत्याहुः यत्र फलवती ल
क्षणा तत्र फलं तु व्यंजनाव्यापारगम्यमेव न शक्तिलक्षणागम्यमिति व्यंजनावृत्तिनिरूपणे स्फुटीकरि
ष्याम इति

फलं तावत् कुत्रचित् गूढं कुत्रचिद् अगूढमिति द्विविधं भवति॥ कुत्रचि गूढं फलं सुचतुरजनज्ञेयं।
अगूढं फलं तु सकलवेद्यमिति। पुनरपि सा समानाधिकरणविषया व्यधिकरणविषया चेति
द्विविधेयं लक्षणा। पुनरपीयं द्विविधा। गौणी शुद्धा चेति। व्यतिरेके लक्षणाप्रभेदा एवेति वि
स्तरभियासंक्षिप्तो निरूपणं विस्तरनिरूपणं त्वाशाधरभट्टकृतत्रिवेणिकाग्रंथे द्रष्टव्यं। नि
खिलभेदानां तत्र विशदतया निरूपणादिति। इत्थं च जहल्लक्षणा। अजहल्लक्षणा। जहदजहल्लक्ष
णा। सारोपा साध्यवसाना। गौणी। शुद्धा चेति सप्तविधा फललक्षणा। क्रमेणोदाहरणानि।
जहल्लक्षणा यथा। गंगायां घोष इति। गंगाधिकरणको घोष इति शाब्दबोधः॥ गंगापदस्य प्र
वाहे शक्तिः सप्तम्या अधिकरणरूपोर्थः। तत्र घोषासंभवान्मुख्यार्थबाधे सति तीरे लक्षणा।
घोषपदं तात्पर्यग्राहकम्। वैयाकरणास्तु आधारोऽधिकरणं षड्विधमधिकरणं औ
पश्लेषिकं सामीपिकमभिव्यापकं वैषयिकं नैमित्तिकमौपचारिकं चेति तत्र वटे गावः सु
शेरते इत्यत्रेव सामीपिक आधारः सप्तम्यर्थ इति शक्तिरेवात्र न लक्षणेत्याहुः। अत्र फलं
तु शैत्यपावनत्वद्योतनमेव। अजहल्लक्षणा यथा। कुंताः प्रविशंति यष्टयः प्रविशंतीत्या
दि अत्र कुंतादीनामचेतनत्वेन स्वतः प्रवेशासंभवात् तद्धारके पुरुषे लक्षणा॥ अत्र फलं तु नि
शंकप्रहरणादिद्योतनमेव॥ अथ जहदजहल्लक्षणोदाहरणं यथा। काकेभ्यो दधिरक्ष

देशोयजतेतद्गालिदंवचनंस्वार्थेविधत्ते॥स्वार्थस्यतदानीमप्राप्तार्थत्वात्॥अन्यथाःअशास्त्रंयागो
नुष्ठितःस्यात्॥एवंप्राङ्मुखोन्नानिभुंजीतेतिस्मार्त्तमुदाहरणंव्याख्यातं॥एकस्यानेकत्रप्राप्त
स्यान्यतोनिवृत्त्यर्थमेकत्रप्राप्त्यर्थंपुनर्वचनंपरिसंख्या॥तथाच॥तिस्रोभार्याब्राह्मणस्ये
ति॥अत्रविवाहविधिनाचतुर्ष्वपिवर्णेषुसंग्रहःप्राप्तःपरिसंख्ययाशूद्रानिषेधोबाध्यते॥
यथावा॥इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तइतिमंत्रः॥स्वसामर्थ्याद्दश्वा
भिधान्यागर्दभाभिधान्यश्चरशनायाग्रहणेविनियुक्तःपुनरश्वाभिधानीमादत्तइति
वचनेनाश्वाभिधान्यांविनियुज्यमानोगर्दभाभिधान्याविनिवर्त्ततइति॥एवंपंचपंचनखा
भक्ष्याइति।अत्रहियदृच्छयाशशादिषुश्वादिषुचभक्षणंप्राप्तंपुनःशशादिषुश्रूयमाणं
श्वादिभ्योनिवर्त्ततइति॥इत्थंचकिमत्रब्राह्मणावधानिषेधवाक्यंविधिरूपंकिंवानिय
मरूपंपरिसंख्यारूपंवा।अत्रोच्यतेनतावन्नियमविधिःपक्षेप्राप्तस्याप्राप्तत्वाभावात्
धात्॥नापिपरिसंख्या।स्वार्थहानिःपरार्थकल्पनाप्राप्तबाधलक्षणदोषत्रयसमास
क्तेः।तस्मादपूर्वविधिरेवेत्याहुः॥किंचशुक्लपक्षेस्वाध्यायोध्येतव्यइतिनियमवि
ध्युदाहरणेप्राशस्त्यमात्रंनतुतदकरणेदोषइति॥परिसंख्यायांतुशशादिभक्षणेन
दोषप्राशस्त्यं।श्वादिभक्षणेतुदोषश्रवणेनप्रायश्चित्तविधानमिनियमविधिःसका
90

शापरिसंख्यायामेदोवगंतव्यः॥अथशुद्धासारोपासाध्यवसनाचयथा॥आयुर्घृतंआयुरेवेत्यादि॥मु
खचंद्रइत्यादावारोपेपिनलक्षणा॥समासोत्पन्नसमुदायशक्त्यानिर्वाहात्॥सारोपलक्षणायांगुणमात्रस्य
लक्षणागुणीतुशक्त्यापरिगृह्यते॥साध्यवसानलक्षणायांतुविषयस्यस्वशब्देनानुपादानरूप
निगरणस्यसत्वादुभयोरपीति॥उक्तंच।सारोपासामतायत्रविषयीविषयान्वितः।ज्ञेयासाध्यवसाना
साविषयीयत्रकेवलइति।यथाद्रोणोव्रीहिरिति॥अत्रद्रोणरूपंयत्परिमाणंतत्परिछिन्नोव्रीहिरित्यर्थः
प्रत्ययार्थेपरिमाणेप्रकृत्यर्थोभेदेनसंसर्गेणविशेषणं।प्रत्ययार्थस्तुपरिछेद्यपरिछेदकभावेनव्री
हेर्विशेषणमिति।सिद्धांतेतुप्रातिपदिकार्थेत्रप्रथमानभवतिकिंतुअर्थेप्रथमेत्येवसरसं॥अत्रा
र्थशब्दोहिरण्यादिविषयपरः॥वृत्तिस्तुशक्तिर्लक्षणाचेति॥एवंसतिद्रोणोव्रीहिरित्यत्रद्रोणशब्दस्त
त्परिमितेव्रीहावुपचारात्सिद्धंगौर्वाहीकवत्॥अत्रकेचिदाहुः।द्रोणादयःशब्दाःपरिमीयतेनेनेतिपरि
माणंइतिव्युत्पत्त्यालोहदारुमयंवापरिमाणमेवतत्चनव्यभिचरतिपरिमेयंतुव्यभिचरत्येवअतस्त
स्यप्रातिपदिकार्थत्वादप्राप्तेपरिमाणग्रहणमितितन्न।गौणलाक्षणिकेषुसिंहोमाणवकःमंचाः
क्रोशंतीत्यादिष्वव्याप्त्यापत्तेः।तत्रविशेष्यस्यमाणवकादेर्दृष्टिसिंहसदृशत्वादिरूपेर्थेगौण्यांनिय
तोपस्थितिकत्वेतियदितर्हिव्रीह्यादेर्दृष्टिद्रोणपरिमितोनियतएवेतिवैयाकरणाः।अत्रोच्य
ते।यथागौर्वाहीकः।अग्निर्माणवकःसिंहोदेवदत्तइत्यादिषुसादृश्यसंबंधप्रतीतेर्गौण्यत्रहलक्ष
णा॥पूर्वार्थापरित्यागेनगुणरूपाधिकार्थग्रहणात्॥तथाद्रोणोव्रीहिरित्यत्रसादृश्यसंबंधाभा
वान्नगौणीलक्षणासंभवति।तस्मात्कथंमनोरमायांगौर्वाहीकवदित्युक्तंसंगच्छते।आलंका

रिकमतेत्वत्रशुद्धा फलवती जहल्लक्षणा तथा सति न किंचिद्दूषणमिति। यथा आयुर्घृतं आयुरेवेदमित्यत्र
सामानाधिकरण्यविषया सारोपा साध्यवसानी च लक्षणा शुद्धा इति तद्वत् द्रोणो व्रीहिरित्यत्रापि द्रोणयार्तु परि
मानपात्रेण परिछिन्ने व्रीहौ द्रोणशब्दो लाक्षणिकः। वस्तुतस्तु सामान्याकारेण परिमाणं शक्योर्थः। द्रोण
रूपविशेषाकारेण लक्ष्यार्थ एवेति सिद्धांतरत्ने ब्रूते॥ अथ साध्यवसानोदाहरणं॥ यथा सिद्धांतकौमुदी
ति शब्दकौस्तुभ इति च॥ अत्र कौमुदीशब्देन कौस्तुभशब्देन च ग्रंथो साध्यवसाना लक्षणा। अन्यथा
इवार्थे कन्विधानस्यदर्शनात् कौमुदीइव कौमुदिका कौस्तुभ इव कौस्तुभक इति स्यात्॥ किंचात्र शब्द भूतः कौस्तुभः
शब्दकौस्तुभ इति मध्यपदलोपी समासः शब्दरूपेण परिणत इत्यर्थः॥ तेन परिणामालंकारः शब्दत्वेन परिणत
स्य कौस्तुभस्यार्थनिर्णयक्रियाहेतुत्वोक्तिः सामंजस्यात्॥ न चोपमित समासः॥ उक्तं तद्इति साधारणधर्म
प्रयोगात्॥ नापि मयूरव्यंसकादिसमासः॥ तत्रोत्तरपदार्थस्य प्राधान्यात्। अत्र त्वर्थनिर्णयहेतुतया पूर्व
पदार्थप्राधान्यापेक्षणात्॥ अर्थनिर्णयो हि शब्दैरेव जायते न तु कौस्तुभेन मणिनेति॥ न चोक्तं न शब्दा
र्थानुरोधेनोत्तरपदार्थप्राधान्यं शक्यम्॥ उक्तं तद्इत्यस्योभयान्वयित्वात्॥ भाष्योक्त तानां शब्दानां निर्म
लत्वं द्योतनाय कौस्तुभपरिणामोक्तिः रीतिः। अत्रेदमवधेयं रूपकोदाहरणे सारोपा लक्षणा॥ रूपकातिश
योक्त्युदाहरणे साध्यवसाना लक्षणेति॥ व्यतिरेकलक्षणा तु साधुरिति पुनः साधुकर्तव्यं किमतः परमित्यादि
बुद्रष्टव्या॥ गौर्वाहीक इत्यादौ जाड्यमांद्यादिगुणसाम्याद्गौणी लक्षणा॥ उक्तं चलक्ष्यमाणो गुणैर्योगाद्वृत्तेरि
ष्टा तु गौणतेति॥ शोणो धावतीत्यत्र शोणगुणविशिष्टे गुणिन्यश्वे लक्षणा॥ नखैर्युतं गर्भिणी नामधेयं
बाणेरश्वैस्त्रहायनैरित्यादिषु च नखगत विंशति संख्या रूपगुणे लक्षणा॥ नखादीनां विंशति संख्या

कत्वेन बाहुल्याद्बहुवचनम्॥ भूचंद्रादीनां तु स्वरूपत एकसंख्याकत्वेनैकवचनमेव लाक्षणिकसंख्यावाचक
त्वादिति विवेकः॥ विंशत्यादीनां तु विंशत्याद्याः सदैकत्वे इति कोशोक्तेर्मुख्यसंख्यावाचकत्वादेकवचनमेवेति॥
एवं बाणैरश्वैस्त्रहायनैरित्यत्रापि द्रष्टव्यं॥ एवं च नंदपूर्णाभद्राजयापूर्णारिक्तापूर्वाः तास्तिथयः प्रतिपदादितिथ्यादाव
वयवावयविभावसंबंधेन नंदाशब्देन नंदासंज्ञिका सुप्रतिपत्षष्ठ्येकादशीतिथिषु लक्षणा। एवं शब्देन पूर्णा
भद्रशब्देन भद्रा जयाशब्देन जया रिक्ताशब्देन रिक्तासंज्ञिकास्तिथयो लक्ष्यंते। किंच। श्यालः स्वस्रोस्तथा ग्रहीत्यत्र
तु स्वसा च स्वस्रो तयोरेकशेषद्विवचनोपादानस्यावश्यकत्वेनोपपत्तौ द्वितीयस्वसृशब्दस्यानुपपत्त्या तत्स्वा
मिनि वसुदेवे लक्षणा॥ श्रीधरस्वामी रन्यस्तु लिंगसमवायेन प्राणभृत उपदधातीति वत्स्वसृशब्देन द्विव
चनानुपपत्त्या मिथुनगुणद्वारा मिथुनलक्षणया स्वसृतत्पत्योरभिधानमित्याहुः॥ एतदेव विवृणोति। त
त्र याचपाणिनीयसूत्रम्॥ तद्धानामामुपधानो मंत्र इतीष्टकासु लुक् च मतोरिति॥ अत्र प्राणभृत् इति शब्दो
यस्मिन्मंत्रे स मंत्रः प्राणभृद्वान् तथा च प्रत्ययस्य सति लुक् प्राणभृदिति हलंतो मंत्रवाचकः शब्दोभिधीयते।
तेन मंत्रवाचकेन प्राणभृत् शब्देन इष्टिकास्तु लक्षणा॥ अन्यथा उपदधाति चिनोति इति चयनवाचको
पदधातीति क्रियापदानुपपत्त्या मंत्रस्य चयनासंभवात्॥ लिंगं चात्रोपदधातीति चयनवाचकं क्रिया
पदमेव। पूर्वत्र तु श्यालपदं लिंगं॥ अत्र वैयाकरणास्तु यथा समानार्थानां विरूपाणामेकशेषस्तथा
भिन्नार्थानां विरूपाणामप्येकशेषः प्रथमयोः पूर्वसवर्ण इति ज्ञापकात् तेन न लक्षणेत्याहुः॥ इत्थं च स्व
सा च स्वसृपतिश्च स्वस्रो तयोरित्येकशेषः। ज्ञापके तु प्रथमा च द्वितीया च प्रथमे तयोरिति फलितोर्थ
इति संक्षेपः। विस्तरस्तु आशाधरगुरुकृतत्रिवेणिकायां द्रष्टव्यः॥ अथ व्यंजना निरूप्यते॥ श

शक्यार्थलक्ष्यार्थनिरिक्तप्रकारेणोपयोग्यन्यार्थबोधिका वृत्तिर्व्यंजना॥ उक्तं च काव्यप्र
काशे॥ अनेकार्थस्य शब्दस्य वाचकत्वे नियंत्रिते॥ संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरंजनम् इति॥ नानावि
धार्थस्य शब्दस्य वाचकत्वे संयोगाद्यैर्नियामकैर्नियंत्रिते सति प्रकृतार्थोपयोग्यन्यार्थबोधजनको व्यापारोऽं
जनं व्यंजनाख्या वृत्तिरित्यर्थः॥ इयं च व्यंजना त्रिविधा॥ शब्दशक्तिमूला॥ लक्षणामूला। व्यंजनमूला चेति।
शब्दशक्तिमूला यथा। तत्कारदाय यद्वदनस्य तत्कावदेस्य शक्तिः कथमन्यथा ते॥ पत्रं कुदातुं गुणशालिपूगं
क्व वादतः खंडयितुं प्रभुत्वं। अत्र यद्वदनस्य सरस्वतीवदनस्य रदादंताः तत्कोऽस्ति कैः शास्त्ररूपाः तत्कार्योवि
चारणीयाः॥ अन्यथैवं नो चेदस्य वदनस्य वादे वाद्विषये शक्तिः सामर्थ्यं कथं स्यात्। न्यायशास्त्राध्य
यनं विना वादं कर्तुं न शक्यत इत्यर्थः॥ चतुर्विंशति गुणशालिनां पदार्थानां पूगः समूहो यस्मिन्नेतादृ
शं पत्रं दातुं च परं वादान् खंडयितुं सामर्थ्यं कुत इति॥ वादृति द्वितीया प्रकृतार्थे॥ नास्ति दंता यस्य स अदन्तस्या
दतः दंतविहीनस्यैते दंतैर्विना वादे॥ वश्च दश्च तयोः समाहारो वादं तस्मिन्वादे। वकारदकारोच्चारणे कुतः श
क्तिः॥ वंकारस्य दंत्योष्ठ्यत्वात् दकारस्य दंत्यत्वाच्चेत्यर्थः॥ किं चास्य गुणशालीपूगः क्रमुको यस्मिन्नेतादृशं पत्रं
नागवल्लीदलं तांबूलमिति यावत्। दंतैर्विना दातुं खंडनं कर्तुं दाव खंडते। कः शक्तिः॥ हि यस्मादंतरहितस्य
पत्रमात्रमपि खंडयितुं प्रभुत्वं कस्यात्। न कदापीत्यर्थः॥ अत्र प्रकृत सरस्वतीवर्णने प्रकृतदंतर
हितपुरुषप्रतीतिरियं शब्दशक्तिमूला व्यंजना। प्रकृताप्रकृतश्लेषे शब्दशक्तिमूला व्यंजनेति प्राचीनाः॥ नाम
तं॥ लक्षणामूला यथा॥ साहेंती सहि सुहअं खणे खणे दूमिआसि मज्झकए॥ सब्भाव णेहकरणिज्जसरि
स अं दाव विरइअं तुमए॥ साधयंती सखि सुभगं क्षणे क्षणे दूनासि मम कृते॥ सद्भावस्नेहकरणीयसदृ

शं दृशमिति तं वया॥ अत्र मत्कांतं रमयंत्या त्वया शत्रुत्वमुत्पादितमिति लक्ष्यते॥ ततो निजनाय
कविषयसापराधत्वप्रकाशनं व्यंग्यमिति लक्षणामूला व्यंजना॥ व्यंजनामूला यथा॥ वि
वरीअरणलच्छीब्रह्मं दट्ठूण णाहिकमलत्थं॥ हरिणो दाहिणणअणं रसाउला झत्ति ढक्केइ। अत्र हरिपदेन दक्षि
णनेत्रस्य सूर्यात्मता व्यज्यते॥ तस्याच्छादनेन सूर्यास्तमयस्तेन कमलस्य संकोचस्तेन तत्स्थस्य ब्रह्मणो दर्शनं तेन
लक्ष्मीनारायणयोर्निधुवनं निःशंकतयेति व्यज्यते तेन व्यंजनामूला व्यंजना॥ द्रष्टं च वेदखाब्धिवियच्चंद्राः १०४०
४ शरेषुयुगखेंदवः॥ १०४५५ इति काव्यप्रकाशोक्ताः समुदायेन दश सहस्राणि चतुःशतानि पंचपंचाशद्ध्व
निभेदाः कथं व्यंजनावृत्तिं विना संभवतीति सावश्यमेवांगीकर्तव्या॥ किं च॥ व्यंजनां विना फलवती लक्षणा
पि न स्यादेव॥ अस्यां फलप्रतीतिर्न शक्त्या संकेताभावात्॥ नापि लक्षणया॥ यया लक्षणया फलप्रतीतिस्तस्याः
फलं कथं प्रतीयते तदर्थमपि लक्षणा सापि फलवतीत्येवं फललक्षणयोः परंपरायामनवस्था स्यात्॥ उक्तं च का
व्यप्रकाशे॥ एवमप्यनवस्था स्याद्या मूलक्षयकारिणीति॥ न च तद्विशिष्टलक्षणा॥ विषयप्रयोजनयोर्युगपत्प्र
तीतिरनभ्युपगमात्॥ अपि च। काव्यनाटकादिष्वानवश्ृंगारादिरसाभिव्यक्तिर्निखिलसहृदयसभ्यानु
भवसिद्धा॥ अतोऽत्र कावावृत्तिरंगीकार्या॥ न तावद्रसादिबोधनेऽभिधा तत्र संकेताभावात्। विभावादिप
दानां तु विभावादिमात्रशक्तत्वात् तत्पदांतरस्य चाभावात्। न हि विभावाद्यभिधानमेव रसाद्यभिधानं॥
रसस्य तादृप्याभावात्॥ रसस्य स्वपदोपदानेरसदोषांगीकाराच्च। तस्माद्रसादिप्रतीतौ व्यंजनावृ
त्तिरेवावश्यमभ्युपेया॥ प्रसंगाद्रसस्वरूपमाह काव्यप्रकाशकृत्। कारणान्यथ कार्याणि सह
कारीणि यानि च॥ रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥ विभावा अनुभावास्तत्कथ्यंते

व्यभिचारिणः। व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृत इति। इत्थं च काव्योपनिबंधमहिम्ना परिगलसीतात्वादिवि
शेषैः साधारण्येन प्रतीतैर्विभावादिभिर्व्यंजितं वस्मनीयसाधारण्येन गृहीतसामाजिकरत्याद्यवच्छिन्नमानंदांशभग्ना
वरणमानंदरूपतया प्रकाशमानं विभावादिसंभिन्नं चैतन्यं रस इति॥ यद्वा रत्याद्यवच्छिन्नं चैतन्यं रसः॥ यद्यपि शृंगारहा
स्यकरुणरौद्रवीरभयानकाः॥ बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥ अन्ये तु शांतस्य शमसाध्यत्वान्नटे
च तदसंभवात्॥ अष्टावेव रसा नाट्येन शांतस्तत्र युज्यते इत्याहुस्तन्न॥ नटे शमाभावादिति हेतुरसंगतः नटे रसा
भिव्यक्तेरस्वीकारात् सामाजिकानामेव रसास्वाद इति। तथा रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा॥ जुगुप्सा
विस्मयश्चैव निर्वेदश्चेति तेन वेति स्थायिभावाः॥ तथा निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः॥ आल
स्यं चैव दैन्यं च चिंता मोहः स्मृतिर्धृतिः॥ व्रीडा चपलता हर्ष आवेगो जडता तथा॥ गर्वो विषाद औत्सुक्यं निद्रा
पस्मार एव च॥ स्वप्नो विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता॥ मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः॥ त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामत इति शृंगारादिरसा
नामनेकत्वं तथापि ध्वनिभेदेष्वसंलक्ष्यक्रमरूपो रसध्वनिरेक एव स्वीकृतः इत्यवधेयं किंच रत्यादीनामपूर्णत्वे
स्थायित्वं संपूर्णपरिपुष्टत्वे रसत्वमिति रसस्थायिभावयोर्भेदः॥ तथा च भरतसूत्रं॥ विभावानुभावव्य
भिचारिसंयोगाद्रसनिष्पत्तिरिति॥ सर्वत्र कार्यकारणसहकारित्वं लोके व्यवहारसंभवे विभावादिसंज्ञां
तरकरणं च रसस्यालौकिकत्वप्रतिपादनार्थमिति। विस्तरस्तु मत्कृते रसतरंगिणीव्याख्यानरूपनूत
नतरीयनाम्नि ग्रंथे द्रष्टव्यः॥ अथ व्यंजनाद्यस्वीकारे काव्यस्योत्तममध्यमाधमत्वव्यवस्थापि ने
स्यादेव व्यंग्याधिक्येनेवोत्तमत्वमिति॥ उक्तं च॥ इदमुत्तममतिशयिनि व्यंग्ये वाच्याद् ध्वनिर्बुधैः क

थित इति॥ इदमिति काव्यं। यथा वा॥ कियन्मज्जनोदनमानयन्कियत्करस्य पप्रच्छ गतागतेन भाम्॥ अहं किमेष्या
मि किमेष्यसीति वा व्यपत्रपन्नम्रं किल लज्जया मुखं॥ ओदनो स्त्री चटी दिवीस्य मरः॥ अत्रोदनं परिवेशयंती
तरुणी प्रतिकस्यचिन्नलवरयाचिकस्य पात्रपरिवेशितौदनपुनः प्रसारणापकर्षणव्याजेन त्वया आ
गंतव्यं मया आगंतव्यमिति प्रच्छाव्यज्यते॥ ततस्तयापि तं प्रतिलज्जाव्याजेन मुखनम्रीकरणचेष्टया त्व
येवागम्यतामित्युत्तरं दत्तमिति व्यज्यते॥ यथा वा। निःशेषच्युतचंदनं स्तनतटं निर्मृष्टरागोऽधरो ने
त्रे दूरमनंजने पुलकिता तन्वी तवेयं तनुः॥ मिथ्यावादिनि दूति बांधवजनस्याज्ञातपीडागमे वापीं
स्नातुमितो गतासि पुनस्तस्याधमस्यांतिकं॥ अत्राधमपदोपादानेन तदंतिकं रंतुमेव गतासीति वा
च्यापेक्षया व्यंग्यार्थस्याधमस्यांतिकं॥ अत्राधमपदोपादानेन तदंतिकं रंतुमेव गतासीति तिशयो
व्यज्यते तेनेदमुत्तमं काव्यमिति॥ मध्यमं यथा॥ अतादृशि गुणीभूतव्यंग्यं व्यंग्ये तु मध्यममिति॥ अता
दृशि वाच्यादनतिशायिनि व्यंग्ये सति गुणीभूतव्यंग्यं मध्यमं काव्यमित्यर्थः॥ यथा वा॥ अम्मेग
रुरु अंमे उरमे रुवे अणाणत्थि॥ पुत्ती एहि रुहह ओजं पेरखइ वेअणा तस्स। अवेगरुद्दयं मेउर
सि मधे वेदना नास्ति॥ पुत्रि त्वंच स्वभावो यः प्रक्षते वेदना तस्य। अत्रातातयौवनामात्रवाधु
नातु वेदना नास्ति सति यौवनानुभव विष्यतिरिति व्यंग्यापेक्षयाऽयं प्रक्षते तस्य वेदनास्ती
ति वाच्यार्थस्यासगत्यलंकारेण चमत्कृतोत्कर्षाधायकत्वात् व्यंग्यस्य गुणीभूतत्वं तेने
दं मध्यमं काव्यं। अधमं यथा। शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतमिति॥ चित्रमि

तिगुणालंकारसहितं॥ अयं गम्यमितिस्फुटप्रतीमानार्थरहितं अवरमधममित्यर्थः॥ यथा वा॥ सौधे पर्व्योमह टो
ट्टे विततरजनि नचिग्नापि कोनुकृता रामुक्ताहारापहारात्तरलखगरवप्रोद्यताकीर्त्तिशांत्यै। कर्पन्नंभोज
कुंभोदरकुहरबहिर्निस्सरत्सट्पदालिकालव्यालीकरेणाकलयतु दिनकृत्कल्मषोन्मूलनं वः॥ अत्र सौ
मरूपहट्टे विततायां रजनिरूपायां वापि स्नायिकायां हट्टस्थापिततारारूपेमुक्ताहारतत्स्यापहारो चौर्या
त्तरलाये खगाः पक्षिणस्तेषामारवः शब्दस्तेनोक्तां या अकीर्तिस्तस्याः शांत्यर्थं कमलरूपकुंभोदर
मध्यान्निस्सरंती भ्रमरपंक्तिरूपां कृष्णवर्णां सर्पिणीं करेणहस्तेन किरणेन॥ कर एव कर इति श्लेषरू
पकं कलयन्नाकर्षयन् दिनकृत्सूर्यः कल्मषोन्मूलनं वो युष्माकं करोत्वित्यन्वयः॥ कस्मिंश्चिद्देशे
तत्रत्यानामियं रीतिः॥ यस्य चौर्याद्यभिशापः प्राप्तस्तेन कुंभमध्ये प्रवेशितसर्पस्य स्वहस्तेन निष्का
सनं कर्तव्यं। यदि तस्य सर्पो दशति तर्हि स एव चोरो नो दशति चेत्तत् शुद्ध इति॥ आ ओजोगुणेन शब्दा
र्थालंकाराभ्यां च चित्रमिदं ज्ञेयं॥ यथा वा॥ नयनरथचक्रमित्रं रूपाहारध्वजं स्ववदनायाः॥ वीक्ष्य पदां
बरगात्रं हरिहरमदनाः कथं न विवदंते॥ सुष्ठु वदनं यस्याः सा तस्याः सुवदनायाः श्रुमांगाः॥ अत्र व
दनशब्देनांगसामान्यलक्षणा॥ प्रथमं मुखचंद्रं वीक्ष्येत्यध्याहारेण योजना॥ अयं मुखचंद्रो
मदीयं नयनं वा मनेत्रं इति हरविवादः॥ निश्चयं हमुपास्महे भगवतः कौमोदकीलक्ष्मणः कोक
प्रीतिचकोरपारणपटू ज्योतिष्मती लोचने॥ याभ्यामर्द्धविबोधमुग्धमधुरश्रीरर्द्धनिद्रायितो ना
भिपल्वलपुंडरीकमुकुलः कंबोसपत्नीकृत इति मुरारिनाटके हरिवामनेत्रस्य चंद्रात्मकतयाव

र्णनात्॥ अस्या अयं मुखचंद्रो मदीयं र थांगं चक्रमिति हरस्य विवादः॥ रथांगे चंद्रा [illegible]
शारदुति महिम्नस्तोत्रे तथा वर्णनात्॥ अयं मुखेंदुः कामोद्दीपकत्वान्मदीयं मित्रमिति मदनस्य विवादः॥
इति प्रथमं मुखं वीक्ष्य नयनरथचक्रमित्रमिति त्रयाणां योजना॥ अथास्या नयने वीक्ष्येत्य [illegible] ध्याहारेणा
योजना॥ अस्या नयनं मीनसादृश्यान्मीनरूपं। तेन मे मत्स्यावतारत्वान्मत्स्यरूपमेवेति हरेर्विवादः॥
एतस्या नयनमीनो यं मम आहारो भक्ष्यमिति हरविवादः॥ त्यजति नमगव्या [illegible] इति वर्णने
नाशिवस्य व्याधरूपत्वात्। नयनमीनोयं मदीयध्वजरूपइति मदनविवादः॥ कामस्य मीनकेतुत्वेन
प्रसिद्धेः॥ सुवदनाया उदरं वीक्ष्येति योजना॥ उदरस्य गगनसाम्यादुदररूपं गगनं वीक्ष्य मन्नाव
ताराक्रांतमिदं मदीयं पदमिति हरेर्विवादः॥ इदं मदीयमंबरं वसनमिति हरविवादः॥ शिवस्य दिगंबर
त्वात्। अनुदराया अस्या इदं अत्योदरं मदीयं गात्रमिति मदनविवादः॥ मदनस्यानंगत्वो [illegible]
गत्वादित्यर्थः॥ अत्र न ओत्यार्थत्वमनुदराकन्येति वचनात्॥ सद सत्संसयगोचरादर्शनि [illegible]
यं स्यास्तथा वर्णनात्। अत्र मुखनयनोदराणां त्रयाणां मध्या हारेण योजनया दृष्टित्यर्थबोधो
भावेन व्यंग्यहितत्वाच्चाधमत्वं॥ इत्थं चोत्तममध्यमाधमेति त्रयाणामपि काव्यानां व्यवस्था व्यंजनावृ-
त्तिं विना न संभवतीत्यवश्यमेव सांगीकार्या॥ तथा चेमुदाहरणेषु स्ववाच्यार्थमात्रे व्यंजनेनाभिधातो
भिन्ना वाच्योऽर्थः शक्तिज्ञानवद्भिरवगम्यते व्यंग्यस्तु सहृदयैरेवेति बोधभेदो व्यंजनायां॥ निःशे
षच्युतचंदनमित्यत्रेतदंतिकं न गतासीति निषेधः शाक्यार्थः॥ तदंतिकरं तु गतासीति विधिश्च

व्यंग्यस्त्वर्थस्वरूपभेदोऽप्यभिधाव्यंजनयोः॥ किंच गतोऽस्तमर्क इत्यादौ वाच्योऽर्थः सर्वैरेकरूपतयैव प्रतीयते व्यंग्यस्तु तत्तत्
प्रतिपत्त्रादिभेदेन नानैवभासते॥ तथाहि॥ आपणिकानां भक्ष्याप्रतिविक्रेयवस्तूनि संह्रियन्तामिति॥ दूती
नामभिसारिकां प्रति अभिसरणमुपक्रम्यतामिति॥ शिष्यस्य गुरुं प्रति सांध्यो विधिरुपक्रम्यतामिति। नागतोऽद्य प्रि
यानिति॥ दूरं मागा इति॥ आप्तप्रायस्ते प्रेयानिति निरवधिर्व्यंग्योऽर्थः प्रकाशते वाच्यस्त्वेक एवेत्यभिधाव्यंजनन बोद्धृ
र्थसंख्याभेदादुद्भेदः॥ वाच्योऽर्थः शब्दोच्चारणमात्रादेव प्रतीयते व्यंग्यस्तु प्रतिभानैर्मल्यादिनेति निमित्तभेदः॥ वाच्यो
र्थस्तु चमत्कारकारी व्यंग्यस्तु प्रतीतिमात्रं चमत्कारकारीति कार्यभेदः॥ वाच्यः केवलप्रतीतिको व्यंग्यस्तु चम ति
त्कारिप्रतीतिक इति प्रतीतिभेदः॥ वाच्यः पूर्वं व्यंग्यः पश्चात्प्रतीयते इति कालभेदः॥ अपि शब्दाश्रयः व्यंग्यः शब्दै
नात्पद तदेकदेश तदर्थ वाक्याद्याश्रया इत्याश्रयभेदः॥ कस्स ण वा होइ रोसो दट्ठूण पिआइ सव्वणं अहरं। सभ
मरउमाघ्याइरिवारिअवामे सहस्सु एह्निं॥ कस्य न वा स्यात् रोषो दृष्ट्वा प्रियायाः सव्रणम
धरम्॥ सभ्रमरपद्माघ्रायिणि वारितवामे सहस्वेदानीं॥ अत्र नेदं उपपत्तिकृतमधरदंश
नं किंतु सभ्रमरपद्माघ्राणजनितमिति व्यंग्यस्य कांतो विषयः॥ अतः परं त्वया नैतादृश
कर्म कर्तव्यमिदं तु मया यथा कथंचिदाच्छादितमिति व्यंग्यस्य कांता विषयः प्रतिपाद्य [illegible]
इति विषयभेदः। अपि च भम धम्मिअ वीसद्धो सो सुणहो अज्ज मारिओ देण। गोलाण
ईकच्छकुडंग वासिणा दरिअसीहेण॥ भ्रम धार्मिक विश्वस्तः स शुनकोऽद्य मारितस्तेन। गोदानदीकच्छकुंजवासिना
दृप्तसिंहेन। अत्र गृहे श्वनिवृत्त्या भ्रमणं विहितं गोदावरीतीरे सिंहोपलब्ध्या भ्रमणमनुमापयति। यद्यपी
रात्र मणं तत्तद्रूपकं रणनिह्नसुपलंभ्य। विपूर्वकं भवति॥ व्यतिरेकस्तिमाह। गोदावरीतीरं श्रीकृष्णमणा

योग्यं सिंहवत्त्वात् वनवत् इत्यनुमित्यैव भ्रमणाभावः किं व्यंजनयेति जनयेति चेदुच्यते॥ यद्यपि स्वयं भीरुस्तथापि
गुरोः स्वामिनो राज्ञो निदेशेन प्रियानुरागेण वा सिंहोपलब्धिसत्त्वेऽपि भ्रमतीत्यनैकांतिको हेतुः॥ शुनो बि
भ्यदपि शूरत्वेन सिंहान्न बिभेतीति। तत्कथमेवं विधाद्धेतोः साध्यसिद्धिरिति। इत्थं च निःशेषच्युतचंदन
मित्यत्र यानि चंदनच्यवनादीन्युपात्तानि तानि स्नानतोऽपि संभवंतीत्यनैकांतिको हेतुरिति॥ स्नानसाधा
रण्येन निबद्धानां विशेषणानामासत्त्वेन भनाद्यनुमापकत्वमपि त्वधमपदसाहचर्येण व्यंजकत्वमेवेति दंतिके
रंतु गतासीत्यस्येति नानुमानं॥ किं चानुमाने साध्यसाधननिर्देशो न चात्र तथा निर्देशः साध्याद्यनुपादाना
त्॥ तस्माच्छक्तिलक्षणातिरिक्ता व्यंजनाख्या वृत्तिरवश्यमभ्युपेया॥ इत्थं च व्यंग्यं तावत्त्रिविधं भवति गूढं अगूढं गूढा म
गूढं चेति॥ तत्र गूढागूढं तावत्कामिनीकुचकलशवच्चमत्कारकारि भवति। उक्तं च॥ नान्ध्रीपयोधर इवा
तितरां प्रकाशो नो गुर्जरीस्तन इवातितरां निगूढः॥ अर्थो गिरामपिहितः पिहितो विभाति काव्येषु तत्रम
रहट्टवधूकुचाभ इति॥ एवमुदाहरणानि विस्तरभिया नोक्तानि॥ अर्थनिष्ठा व्यंजना तूक्ता काव्य
प्रकाशकारैः॥ वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः॥ प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रति
भाजुषां॥ योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सेति॥ बोद्धव्यः प्रतिपादनीयो जनः॥ काकुर्ध्वने
र्विकारः॥ वाक्यवाच्याभ्यां सहितोऽन्यसन्निधिः॥ प्रस्तावः प्रकरणं। वक्त्रादीनां वैशिष्ट्यात् शक्तिलक्षणा
तिरिक्तोऽर्थो व्यज्यते नया सा व्यंजनेति व्युत्पत्तेः॥ इत्थं च शक्तिलक्षणातिरिक्ता विवक्षितान्यार्थधीज

नकोव्यापारो व्यंजनेतिदं॥ दिग्मात्रमुदाहृतमिते। वक्रोक्तैर्वैशिष्ट्याद्यथा॥ देवः पतविंदुषिमेवधराज
सत्यानिर्णीयते न किमु निश्चियते स्ववस्या। नालं नलः खलु तवाति महानलाभो यद्येनमुज्झसि वरः कतरः प
रस्ते। अत्र वक्त्या सरस्वत्या दमयंती प्रति कृते नलवर्णने श्लेषमहिम्ना खंडुलाग्नियमवरुणानां भैमीप
रिणयनरूपकार्यार्थं नलवेशधारिणां चतुर्णामपि संसूचनं व्यंग्यमर्यादयैव कृतमस्तीत्यवधेयं। अ
थयं नलोस्त्वेतेन नलवेशधारिणस्ते देवा इति प्रकाशतया वर्णने तु सजातीयैर्देवैः सहास्याः सरस्वत्याः
शत्रुत्वं स्यादिति। अत्र विदुषीसनेन श्लोकोक्ति परिज्ञानचातुर्यं दमयंत्याः संपादितमस्तीति॥ अत्र
वक्त्याः सरस्वत्यास्तथा बोद्धव्यस्य प्रतिपादनीयस्यैंद्रादेस्तथात्वात् किमु न निर्णीयते किमु न नियते इति काकोक्ते
रत्र यावतामपि वैशिष्ट्यं ज्ञेयं॥ यथा वा मम॥ सत्यासक्तमना विभूषिततनुर्भूत्या गवामीश्वरः स
र्वज्ञो द्विजराजराजितवपुर्मायान्वितो वृत्तिवित्॥ आनंदीक्षितपूरकः सुमनसामानंददोनंतदृ
क् ब्रह्मोपासनतत्परः स भगवान् गंगाधरः पातु नः॥ अत्र श्लेषवशात् व्यंजनावृत्त्या प्रतीयमाने बुप्र
थमं शिवपक्षे व्याख्यानमाह॥ धरतीति धरः पचाद्यच्। गंगाया धरो गंगाधरः शिवः॥ गंगा
धकरो ध करिपुरित्यमरवचनात्। को गरूढोयं शब्दः॥ नः पात्वित्यन्वयः॥ स कीदृशः सत्या
यां दाक्षिण्यामासक्तमनाः॥ तथा भूत्या भस्मना॥ भूतिर्भस्मनि संपत्त्यमरः विभूषिततनुः शोभितशरीरः। तथा ग

वांसर्वविद्या

नां ईश्वरः॥ ईशानः सर्वविद्यानामिति श्रुतेः॥ यद्वा गवामिषूणामीश्वरो रक्षिता॥ दैत्यव
धार्थमित्यर्थः॥ यद्वा गवां दिशां रक्षकः॥ गवां पंचमुखत्वेन पंचदशनेत्राणां धारणे समर्थ इति वा॥
गोर्नादित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः। स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि॥ नृस्त्रि
योः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमस्वित्यभिधानात्॥ पुनः कीदृशः सर्वज्ञः सर्ववेत्ता॥ द्विजानां
ब्राह्मणानां राजा इति द्विजराजश्चंद्रः॥ राजाहस्सखिभ्यष्टच्॥ सोमोस्माकं ब्राह्मणानां राजे
ति श्रुतेः॥ तेन राजितवपुः शोभितविग्रहः॥ तथा मायया योगमायया पार्वतीरूपया वा अन्वितो
युक्तः॥ तथा वृत्तयः सर्वजनचित्तवृत्तयस्ता वेत्तीति वृत्तिवित्॥ पुनश्च कीदृशः॥ आसमंतात्स्व
वाहनभूतो नंदीवृषभस्तस्य यदीक्षितं तस्य पूरकः॥ सुमनसां देवानामानंदकर्ता॥ अनंतः
सर्वविशेषस्तं पश्यतीति अनंतदृक्॥ ब्रह्मण उपासने चिंतने तत्परः॥ इति उक्तविशेषण ना
विशिष्टः स भगवान् गंगाधरः शिवः नोऽस्माकं पातु॥ प्रार्थना लोट्॥ अथ विष्णुपक्षे॥
पादोदकीभूता या गंगा तस्या धरो विष्णुः स जगत्प्रसिद्धः॥ भगवान् नानैश्वर्ययुक्तः॥ तथा स
त्यायां सत्यभामायामासक्तमनाः॥ कृष्णस्तु भगवान्स्वयमित्युक्तेः विष्णुकृष्णयोरभेदेन वर्ण
नं॥ पुनः कीदृशः॥ भूत्या संपत्त्या भूषिततनुः॥ भूतिर्भस्मनि संपदीत्यमरः॥ गवां धेनूनां
ईश्वरः पालको नियंतेति यावत्॥ सर्वं जानातीति सर्वज्ञः॥ यः सर्वज्ञः॥ स सर्वविदिति श्रुतिहृदय
दर्शनात्॥ द्विजराजेन इंदुना शोभितशरीरः॥ वामनेत्रस्य चंद्ररूपत्वात्॥ यद्वा रासोत्सवे सर्व

णीनामुदगाछ्चोमदन्निति चंद्रोदयस्यसत्वात्तेन शोभितदेहः॥ तथामायया योगमायया अन्वितः॥
योगमाययामुपाश्रितइतिभागवतेतथावर्णनात्॥ इन्दिरा॥ गोपिकानांमाश्रितवत्तयस्तासांवेत्ता॥
सहस्रषोडशसहस्रराजकन्यानांयुगपत्स्ववरणविषयेयाश्चित्तवृत्तयस्तासांवेत्ता॥ तथाआनंदी॥ आ
नंदवान्। आनंदंब्रह्मणोरूपमितिश्रुतेः॥ भक्तजनानांगोपिकानांवाईप्सितपूरकः॥ तथासुमनसांदेवाना
मानंददः॥ शुद्धचित्तानांवा। अनंतदृक् बहुनेत्रः। सहस्राक्षःसहस्रपादितिश्रुतेः। पुनःकीदृशः। ब्रह्मो
पासनेवेदाध्ययनेतत्परः। यद्वाब्रह्मउपसमीपेयदासनंकमलंतदस्तिअस्येतिब्रह्मोपासनः पद्मना
भइत्यर्थः। तत्परंप्रतिपाद्यंयस्येतिविशेषणसमासः॥ अस्मिन्विष्णुपक्षेगंगाधरशब्दोयोगिकः॥
अथब्रह्मपक्षेयोजना॥ किंच॥ सत्येसत्यलोकेआसक्तमनाः॥ तथा भूत्याभस्मनाभव्यमूर्तिः॥ सर्व
दासंध्योपासनविधौभस्मधारणस्यश्रुतिस्मृतिविहितत्वात्प्राशस्त्यंबोध्यं॥ त्र्यायुषमितिश्रुतिः।
स्मृतिरपि॥ धार्यंभस्मत्रिसंध्यंतुगृहिणाजलसंयुतं॥ वानप्रस्थयतीनांतुसायाह्नेजलवर्जितंतु॥
ति॥ तथागवांक्रतूनांईश्वरःफलदाता॥ यद्यपिगोशब्दस्यक्रतुविशेषवाचित्वेनैकवचनसंभवस्त
थापिक्रत्वंगकर्मणामजेकत्वेनबहुवचनं॥ ब्रह्मणःक्रतूनांफलदातृत्वंचोक्तंभगवद्गीतायां॥
सहयज्ञाःप्रजाःसृष्ट्वापुरोवाचप्रजापतिः॥ अनेनप्रसविष्यध्वमेषवोऽस्त्विष्टकामधुगि
ति॥ प्रसविष्यध्वमितिसार्वत्रिकःपाठस्त्वचिंत्यः॥ स्यप्रत्ययेलोटोऽसंभवात्। लडि अडाग
मणभस्यदुर्वारत्वाच्च॥ यथाभागवतेप्राचीनतूलेषुकुशेषुधीरइतिप्राचीनयथार्थपा
वेतदर्थबोधानवगमात्केनचिद्विदुषाभासेन प्राचीनमूलेष्विति कल्पितःपाठोले १९

खकैर्भ्रांत्यापरंपरयालिखितस्तद्द्वयमपि॥ श्रीधरस्वामिनानुप्रागग्रेष्वितियथाछि
ताएवपर्यायःकृतः॥ तूलस्येवाग्रपर्यायःसंभवतिनतुमूलस्य॥ उक्तंचधर्मशास्त्रे। अप्रसूता
श्चकुशाहिद्विविधामताः॥ अप्रसूतास्तर्पणादौप्रसूतास्त्वासनेस्मृताइति॥ अप्रसूता
कुस्वाःप्रादेशमात्रास्तर्पणपवित्रादिविधानेग्राह्याः। प्रसूताःसतूलाआसनविधौग्रा
ह्याः॥ तूलंकुशाग्रमिति॥ अथस्वाध्यायस्याध्ययनोपक्रमेऽनेवात्रीनूरुकंश्चप्रक्षा
ल्योभवत्यग्निंप्रतिष्ठाप्याग्न्याभावेतूदगादित्यंवोपसमाधायदर्भानुपस्तीर्यदर्भेष्वासीनः
प्राक्कूलेषुउदक्कूलकेषुवेतिश्रुतेः॥ दर्भेष्वासीनःप्राक्तूलेषुब्रह्मवर्चस्कामःउद
क्तूलेषुपशुपुत्रकामः। उभयेषूभयकामःपशुस्वस्त्ययनेकामोव्रीहियवहोमंप्र
युंजीतेति॥ एवंप्राक्तूलेबर्हिष्यासीनोगंगातीरउदङ्मुखइतिद्वादशारंवधेपिबोध्यं॥ अतएवप्राक्
तूलेइतिलेखकैर्भ्रांत्यालिखितमस्तीति॥ यद्वासरस्वतीरूपाणांगवांवेदानांईश्वरःप्रवर्तकः॥
तथास्रष्टादिषुसर्वज्ञः पुनःकीदृशः ब्रह्मलोकेब्रह्मणाप्रेवसत्वात् रूपवान् प्रोमिताविग्रहः तथास्त्र
ष्टिकल्पारंभेगुणमय्यामाययाअन्वितः तथाविनिर्जनानांव्यवहारस्तस्यवेत्ता तथाआदियुक्तः त
थासुमनसांदेवानांमोक्षीतिप्रेरकः अतएवानंददः तथाअनंतानिब्रह्मांडानिपश्यतीत्यनंतदृक्
तथाप्तवेदाध्ययनपरत्वेनब्रह्मणःपरमात्मनउपासनैकनिष्ठः सइतिसाक्षात्कर्तृत्वेनप्रसिद्धःभगवा
नगंगाधरोब्रह्मानोस्मानवतु किंचायंगंगाधरशब्दोयोगेनसमुद्रवाचकस्तत्पक्षेयोजनासत्येमर्यो

784

दापालने आसक्तचित्तः भूत्या रत्नमुक्तादिसंपत्त्या भूषितवपुः तथा गवां जलानां मीश्वरोधिपतिः
उलयोरप्येदृज्जाऽधिपतिरपि सर्वेशः नदीपर्वतादीनां देहभूतत्वात् द्विजराजेन सुपुत्रेण चंद्रेण
विराजितइत्यर्थः पुनः कीदृशः मां लक्ष्मीं याति प्राप्नोतीति मायो विष्णुस्तेनान्वितो युक्तः तथा वृत्तिरीश्व
रस्य चित्तवृत्तिस्तस्या वेत्ता ईश्वरा तापपरिपालक इत्यर्थः तथा अनंदी चंद्रोदयसतीत्यर्थः पुनः किं ल
क्षणः सुमनसां कियपि काये प्रशस्तचित्तानां नेयः … कार्णाईप्सितप्रदः अत एवानंदजनकः ॥
अनंतं शेषणागं पश्यतीति अनंतदृक् पविल्लोः पर्यंकतां प्राप्तस्य तस्य स्वभिन्नत्वे सदा वर्तमानत्वात् अस
लोक्षि … उपसमीपे आसने रक्षणलक्षिकं तत्परः उद्युक्तः तथा सभगवान् नारायणसहितः …
मुहूपस्थेयोजना अथ गंगाधरनामा शास्त्री द्विजस्तत्पक्षे योजना यदृच्छा शब्दोयं पित्रादिकृतसंकेत
त्वेन संज्ञात्वाद्विजविशेषे रूढः स लोकस्तत्संभाषणे आसक्तचित्तः पुनः किं विशेषणविशिष्टः भूत्या
संपत्त्याभरणेनाभूषितविग्रहः गवां वाचां ईश्वरोधिपतिः साक्षाद्बृहस्पतिरेवायमित्यारोपः अ
र्थाद्गम्यतिनिमित्त इत्यर्थः अत एव सर्वज्ञः सर्ववेत्ता यद्वा सर्वाणि शास्त्राणि सर्वलोकव्यवहारान्वा
सकलवर्णाश्रमधर्माचारान्वा जानातीति तादृशः पुनः कीदृशः द्विजानां ब्राह्मणानां राजेति द्विजराजः
स चासौ राजितवपुश्चेति विशेषणसमासः यद्वा द्विजाश्च राजानश्च तैः राजितवपुः पुनश्च मा लक्ष्मीः
अयः शुभावहो विधिः ताभ्यामन्वितो युक्तः पुनश्च वृत्तिवित् कृतन्नितसमासे कशोषस्तानामे तथा

तुरूपाः … व्यंजना … सांवेत्ता तथा आनंदी ॥ सदानंदयुक्तः मु
ध्यसुमनसां विदुषांभीप्सितप्रदः को तएवानंददः हर्षजनकः तथा हरमते नेनेति ह क लार्थ अनंतदृक् ज्ञानस्ये
ति यद्वा अनंतं शब्दब्रह्म पश्यतीति अनंतो विष्णुस्तं पश्यतीति वा अनंतानि शास्त्राणि वा पुनः कीदृशः ॥
गायत्र्याख्यं परं ब्रह्म तस्योपासने तत्परः सदोद्युक्तः तथा तत एव भगवान् भाग्यशालीसः सर्वत्र भास
इति गंगाधरशास्त्रि द्विजपरत्वे योजना बोध्या अयं गंगाधरशब्दो योगशक्त्या अर्जुनाम्नि ऋषिविशेषेपि
प्रवर्तते उक्तं च आशावादिषिता महत्स्व निपमत्वा पातुपात्रे जलं पश्चात्तेन गंगाधरो भगवतः पादोदकं
पावनं भूयः शंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या कल्मषनाशिनी विजयते गंगा मनोहारिणीति
एतत्परत्वे योजना तु स्वयमूह्या अत्रावि वादन्तु पूर्वमिमामप्रकृतत्वेपि समुद्ररूपार्थस्य प्रकृतत्वात्प्रकृ
ताप्रकृतश्लेषस्तोनशब्दशक्तिमूलः … ध्वनिरेवायमिति प्राचीनानां मतमित्यवधेयं किं च भगवानिति विशे
षणोपादानाद्देतद्ग्रंथकर्तुः कवेरपि नामस्तवितमासिं तेन मुद्रालंकारोपि व्यज्यते सूच्यार्थसूचनं तत्तु
दे… लक्षणात् यत्रोक्तविशेषणाद्विशेषणाच्च … प्रतिपद्यन्ते सरलो जनो न जाना
ति तथार्थसंसूचनं क्रियते तत्र व्यंजनावृत्तिरेव अथो क्लिविशेषण … यथा द्युतिं सुरतरंगिणी सपदि ना
नावो संगमभिवेन … पथिकमास्नभी तिं ब्रह्म निधाय कृदिनिर्भरं विपुलचारु कुंभयंदस्फुरत घन
घनागमेघनरससाअपारं ब्रजेति अत्र गंगातीरे जलानयनार्थमागतायानायिकायाः पथिकयुवानं प्रति

समूचनोक्तिरियं हे पथिके यं सुरतरंगिणी गंगा वर्तते महानदी त्वर्थः स्वेन नदितुमशक्तोऽस्यर्थः स पद्भिनौका
या आगमनं न भविष्यति तथा तत्रास्ति मज्जुनं स सर्वांस्तो भवेत् अतो भयं मागाः देदीप्यमानतिमिरडमेघश्या
ड्डुभावे सति कृदयमध्ये विशालके कुंभद्वयमवलंब्याम्भनरसस्यापि पुलकजलस्य पारं परतीरं गच्छेति प्रसिद्धोऽर्थः ॥
व्यंगोऽर्थस्तु हे पथिके ति संकुच्यान तथापि रसातिशयो भविष्यतीति व्यज्यते दूमं लक्षणा सुरतो निधुवने
रं जिपी प्रेमयुक्ता सपदि अधुनादिवसे तु नौ आवयोः समागमेन भविष्यति किंतु पश्चात् रात्रिमज्जुनं स सर्वा
स्तो भविष्यति भयं मागाः मम यहे स्वाम्यादिभयं न रतिएकाकिन्या स्थीयते अतिन्वर्षाकाले हृदये दृग्ति
निर्भरं गाढं विशालकपीनस्तनयुग्मं निधाय मा तोय घनो निविडो यो रोगसः शृंगारादि समस्य अनुभवं कुरु
ष्वेति गूढतया सूचितमिति व्यंजनाएव बोध्या यथा अयि अयि अपूर्वं चान्वि अं कालमाहि लेन नु किं
तु अंकं मे ड अकरग हि ओक ल्लो अहरं पदिहि अचुं बिअं मा आपां अयि अयीति कोमलामंत्रणा कां
ताकपुकपभार्यया यत्कर्मतन्तं तद पूर्वमेव अपूर्वं तो मे वय्यन लि दिकराभ्यां कपौ गृहीतो अधरं ओ
ष्ठं पतिहसनयनयनं अविकृतनेत्रं चुंबितमिति अत्र स्वगृहे उपपतिना सह क्रीडंत्या तथा बहिर्ग
त्वा पुनः स्वगृहमागच्छंतं स्वस्वामिनं प्रति निजापारसाविर्भावं प्रकटी कुर्वन् कराभ्यां कर्णद्वयपिधानेन
बाधिर्यं अविकृतनेत्र चुंबनेनां ध्यं च संपाद्य त्वया मत्कृतानि भयं त्वया गम्यतामिति सूचितं विकृतने
त्रेण दर्शनाभावोऽस्ति अविकृतनेत्रस्य तु चुंबनेनां ध्यमिति दर्शनाभावः कर्णद्वयपिधानेन बाधिर्यं

११
३

दुपपतिपादसंचारशब्दाभावश्च व्यज्यते सर्वथ्य मेव शक्तिलक्षणात् इति द्विकाव्यं जनावृत्तिरंगीकार्येत्यल
मिति विस्तरे पोतेति दिक् ग्रंथोऽविचारदीपाख्योरचितो निर्दुष्टां मुदे भवगवद्धि दुषा चात्र न वर्णनैव प्रकल्पितं ॥ १
यथागेहे गाढं तिमिरमपनीय प्रभवति प्रदीपो यं लोके प्रकटयितुमर्थास्तु निखिलान् तथायं सद्ग्रंथो निखि
लबुद्धक्लेशांधतमो पनीय प्रख्यातान् चरयतु पदार्थास्तु सकलान् २ येऽलंकारविवेचनाकुशलबुधाः स
त्साक्षिणः सत्क्रियानिष्णातारस्त काव्यनाटकगुणग्राहे कृतानान्विताः दंभेर्ष्याविमुखाः स्वभावसरला
ये वा गुणग्राहिणः सुज्ञानां ततं मुदं वितनुतां ते प्राप्तमियं मे कृतिः ३ आनंदरामविबुधात्मजतामुपे
तः शास्त्रार्थशोधनपरो भगवान् बुधोऽहं यो विश्वसमो विबुधवृंदमथात्रमंतौ थ तत्साध्वसाधु चरितं मय
का निबंधे ४ कालीयामस्थितिजुषा नाम्ना भगवताधुना विप्रेणेदं विरचितं गंगाधरमुदेऽस्तु तत् ५
संवद्वाणषड्वसु शीतमे ऽब्दे मासि चाश्विने शुक्ले सोमे च पंचम्यां प्रातः संपूर्णतामयं ६ इति श्री रैकहा
तीयानंदरामभट्टात्मजेन भगवता रचितो ग्रंथः संपूर्णतामगमत् श्रीः श्रीः श्रीः श्रीः